रक्षतु त्वा पृथिवी रक्षतु द्यौस् सूर्यश् च त्वा रक्षतां चन्द्रमाश् च ।	रक्षन्तु…सूर्यस्य * * * *
मा त्वा क्रव्याद् अभि मंस्तारात् संकसुकाच् चर ।	…मंस्तार सङ्कमुका * ॥२॥
अन्तरिक्षं रक्षतु देवहेत्याः ॥२॥	
बोधश् च त्वा प्रतीबोधश् च र[क्ष]ताम् [अ]स्वप्नश् च त्वानवद्राणश् च रक्षताम् ।	* चि … °द्राणिश् *
गोपायंश् च त्वा रक्षतां जागृविश् च ॥३॥	गोपायशि् चि * * जाग्रविश् *
ते त्वा रक्षन्तु ते त्वा गोपायन्तु ते त्वांहसस् सायन्तु ? ।	
तेभ्यो नमस् तेभ्यस् स्वाहा ॥४॥	
जीवेभ्यस् त्वा समुदे वायुर् इन्द्रो धाता दधातु सविता त्रायमाणः ।	* * समिते…
मा त्वा प्राणो बलं हासीद् असुं ते निर् ह्वयामसि ॥५॥	…वल * असन् ती * °सी
मा त्वा जम्भस् संहनुर् मा तमो विदन् मा जिह्वा बर्हिः प्रमयुः कथा स्याः ।	* * जम्भस्यो हनुर् * तुसो विदं * जिह्व वर्युः
उ[त्] त्वादित्या वसवो भरन्तूद् इन्द्राग्नी स्वस्तये ॥६॥	* त्वादित्य * भरन्तूर् * * [प्रमुयुः * स्य
अयं देवा इहैवास्त्व् अयं मामुत्र गाद् इतः ।	* * इहवास्त्व् * मावत् प्रगाध् *
इमं सहस्रवीर्येण मृत्योर् उत् पारयामसि ॥७॥	…पादयामसि
उ[त्] त्वा मृत्योर् अपीपरं सं धमन्तु वयोधसः ।	…नमन्तो वयोवयोधसः
मा त्वा व्यस्तकेश्यो मा त्वाघरुदो रुदन् ॥८॥	…व्यस्तकेश्ये * त्वाधरिदो रुजम्
आहार्षं त्वाविदं त्वा पुनर् आगाः पुनर्णवः ।	…पुनर्नव
सर्वाङ्ग सर्वं ते चक्षुस् सर्वम् आयुश् च ते ऽविदम् ॥९॥	
उं[त्] त्वा द्यौर् उत् पृथिव्य् उत् प्रजापतिर् अग्रभीत् ।	
उ[त्] त्वा मृत्योर् ओषधयस् सोमराज्ञीर् अपीपरन् ॥१०॥	…अपीपरम्
व्यू अवात् ते ज्योतिर् अभूद् अप त्वत् तमो अक्रमीत् ।	यावत् * * अभूर् * तत्वमो क्रमेत्
अप त्वन् मृत्युं निर्ऋतिम् अप यक्ष्मं नि दध्मसि ॥११॥ ॥का° २॥	* त्वं .:.

१६.३

…८.२.१–७, ९, ८, १०

आ रभस्वेमाम् अमृतस्य श्नुष्टिम् अच्छिद्यमाना जरदष्टिर् अस्तु ते ।	* * * स्वष्टिम्… [मेष्ठा
असुं त आयुः पुनर् आ भरामि रजस् तमो मोप गा मा प्र मेष्ठाः ॥१॥	अमन् तायुः * * भवामि * त्वमो * रा * *
जीवतां ज्योतिर् अभ्येहि लोकम् आ त्वा हरामि शतशारदाय ।	जीवता * अभ्येइ…
द्राघीय आयुः प्रतरं ते कृणोम्य् अवमुञ्चन् मृत्युपाशान् अशस्तिम् ॥२॥	* * प्रतिरं * * अमुञ्च मृत्युपाशां अशस्ति
वातात् ते प्राणम् अविदं सूर्याच् चक्षुर् अहं तव ।	वाता * * सूर्या * अहरि
यत् ते मनस् त्वयि तद् धारयामि सं वृङ्क्ष्वाङ्गैर् वद जिह्वयालपन् ॥३॥	* * * तवि दद् * * वृक्शांगैर् * जिह्वयापलम्
प्राणेन त्वां द्विपदां चतुष्पदाम् अग्निम् इव जातम् अभि सं धमामि ।	…अग्नीव * अवि * धमासि
नमस् ते मृत्यो चक्षुषे नमः प्राणाय ते ऽकरम् ॥४॥	…चक्षषे नमनमः * * *
अयं जीवतु मा मृतेमं सम् ईरयामसि ।	* * * * सु वीरयामसि
कृणोम्य् अस्मै भेषजं मृत्यो मा पुरुषं वधीः ॥५॥	…वधि
जीवलां नघारिषां जीवन्तीम् ओषधीम् अहम् ।	जीवनालां…
त्रायमाणां सहमानां सहस्वतीम् अरुन्धतीम् इ[ह] ह्वये अस्मा अरिष्टतातये ॥६॥	…अपा
अधि ब्रूहि मा रभथास् सृजेमं तवैव सन् सर्वहाया इहास्तु ।	* * * रपथा सृजेवं * सं सर्वा इहाइहास्तु
भवाशर्वौ मृडतं शर्म यच्छ[त]म् उपजित्य दुरितं धत्तम् आयुः ॥७॥	भवाशर्वो …
देवानां हेतिः परि त्वा वृणक्तु पारयामि [त्वा] रजस उ[त्] त्वा मृत्योर् अपीपरम् ।	…रजसा…
आराद् अग्निं क्रव्यादं निरूहं जीवातवे ते परिधिं दधामि ॥८॥	* * क्रव्याधं निर्हम् * * परियं ददामि
अस्मै मृत्यो अधि ब्रूहीमं दयस्वोद् इतो ऽयम् एतु ।	** * ब्रूहि श्मं जयस्वोद् * हिम् *
अरिष्टस् सर्वाङ्गस् सुश्रुज् जरसा शतहायन आत्मना भुजम् अश्नवत् ॥९॥	* सर्वाङ्ग स्रुपु जरमाश् छतायनात्मना *
यत् ते नियानं रजसो मृत्यो अनवधर्ष्यम् ।	* * नीयानं * नवधरिष्यं [उष्णवात्
पथ इमं तस्माद् रक्षन्तो ब्रह्मास्मै वर्म कृण्मसि ॥१०॥ ॥का° ३॥	पथेमं त्वास्या रक्षन्तु ब्रह्मास्मे * *

शौ ८.२.११–२०	१६.४	
	कृणोमि ते प्राणापानौ जरां मृत्युं दीर्घम् आयुस् स्वस्ति ।	
[४]शौ आराद् नास्ति	वैवस्वतेन प्रहितान् यमदूतांश् चरत आराद् अप सेधामि सर्वान् ॥१॥	* प्राहितां * चरतारान् उप * *
	आराद् अरातिं निर्ऋतिं परो ग्राहिं क्रव्यादः पिशाचान् ।	
	रक्षो यत् सर्वं दुर्भूतं [तत्] तम इवाप हन्मसि ॥२॥	* * * * तवैवाप *
	अग्नेष् टे प्राणम् अमृताद् आयुष्मतो वन्वे जातवेदसः ।	* ट्वे ... वनवे *
[३]शौ यथा न	यत्रा न रिष्या अमृतस् सजूर् असस् तत् ते कृणोमि	* * रिष्यामृतस्य दूतिशम् * * *
	तद् उ ते सम् ऋध्यताम् ॥३॥	
[२]शौ अभिश्रियौ	शिवे ते स्तां द्यावापृथिवी असंतापे भिश्यू ? ।	
	शं ते सूर्य आ तपतु शं वातो वातु ते हृदे ।	* * सूर्या तपति * * वात ...
	शिवा [अ]भि क्षरन्तु त्वापो दिव्याः पयस्वतीश् शिवास् ते सन्त्व्	* * क्षरन्ति ...
शौ ओषधयः	ओषधीः ॥४॥	
	उत् त्वाहार्षम् अधरस्या उत्तरां पृथिवीम् अभि ।	उ त्वाहारिषम् अधरास्याद् * पृथिवम् अति
	तत्र त्वादित्यौ रक्षतां सूर्याचन्द्रमसा[व्] उभा ॥५॥	* त्वादित्यो ...
	यत् ते वासः परिधानं यां नीविं कृणुषे त्वम् ।	* * * परिधानी * नीवं ...
	शिवं ते तन्वे तत् कृण्मस् संस्पर्शे ऽद्रूक्ष्णम् अस्तु ते ॥६॥	* * तन्मे * कृण्वः * दुक्षणम् * *
[२]शौ मर्चयता	यत् क्षुरेण वर्चयता सुतेजसा वप्ता वपसि केशश्मश्रु ।	
शौ शुम्भं(शुभं वा) मा न आयुः	शुम्भन् मुखं मैनम् आयुः प्र मोषीः ॥७॥	शुम्भर् ...
	शिवौ ते स्तां व्रीहियवाव् अबलासाव् अदोमधौ ।	* * हस्तां वृह्यवाव् * अधोमधौ
[४]शौ मुञ्चतो अंहसः	एतौ यक्ष्मं वि बाधेते एतौ मुञ्चतो मांहसः ॥८॥	यतो ... यतो मुञ्चतु मांहस
	यद् अश्नासि यत् पिबसि धान्यं कृष्याः पयः ।	* अष्णासु सुर्यदि पिवमि धान्यः * पय
	[यद्] आद्यं यद् अनाद्यं सर्वं ते अन्नम् अविषं कृणोमि ॥९॥	* आढ्यं * अनाढ्यं ...
[२]शौ कोशेपु दध्मसि अपि	अह्ने च त्वा रात्रये चोभाभ्यां परि दध्मसि ।	... रात्री ...
[४]शौ इमं मे परि रक्षत	[अ]रायेभ्यो जिघत्सुभ्य इमं नः परि रक्षता ॥१०॥ ॥का° ४॥	* जिगत्सुभ्य ...
शौ ८.२.२१–२६,२७	१६.५	
[२]शौ चत्वारि कृण्मः	शतं ते ऽयुतं हायना[न्] द्वे युगे त्रीणि चत्वारि सन्तु ।	
शौ देवास्ते ऽनु मन्यन्ताम्	इन्द्राग्नी विश्वे देवा अनु मन्यन्ताम् अहृणीयमानाः ॥१॥	
[२]शौ दध्मसि	शरदे त्वा हेमन्ताय वसन्ताय ग्रीष्माय परि दध्मसि ।	
	वर्षाणि तुभ्यं स्योनानि येषु वर्धन्त ओषधीः ॥२॥	* * स्योनान * वर्धत्व् *
	मृत्युर् ईशे द्विपदां मृत्युर् ईशे चतुष्पदाम् ।	
[४]शौ उद् भरामि स मा बिभेः	तस्मा[त्] त्वा मृत्योर् गोपतेर् उद् धरामि स मा मृथाः ॥३॥	* * * गोपयेर् ... मृत
एवं शौ	सो ऽरिष्टो न मरिष्यसि [न मरिष्यसि] मा बिभेः ।	सं विष्ट ...
शौ * * * म्रियन्ते * * अधमं	न वै तत्र प्र मीयन्ते नो यन्त्य् अधरं रजः ॥४॥	... न्यो * अधरो रुज
[२]शौ जीवति [तमः	सर्वो वै तत्र जीवतु गौर् अश्वः पुरुषः पशुः ।	शवो ...
	यत्रेदं ब्रह्म क्रियते परिधिर् जीवनाय कम् ॥५॥	* * क्रीयते ...
[२]शौ सबन्धुभ्यः	परि त्वा पातु समानेभ्यो ऽभिचारात् सुगन्तुभ्यः ? ।	* * * सुसानेभ्यो भिचराद् *
एवं शौ	¿अमम्रिर् भवामृतो ऽतिजीवो ? मा ते हासिषुर् असवश् शरीरम् ॥६॥	अमुर्प्य त्वामृतो थजीवो * * हासिषर् ...
शौ नास्ति	विश्वे त्वा देवा अमृतेन बिभ्रत्व् अधिवक्ता पशुपतिष् टे ऽस्तु ।	* * देव मृतेन * अधिवक्त्रा ...
	अनामयस् सविता ते कृणोत्व् आ त्वा प्राणो ? शतजीवनाय ॥७॥	अनामयत् ...
[२]शौ अतितार्याः	ये मृत्यव एकशतं या नाष्ट्रा अतिजीव्याः ।	... तुजीव्या
	मुञ्चन्तु तस्मात् त्वा देवा अग्नेर् वैश्वानराद् अधि ॥८॥ ॥का° ५॥ ॥अनु° १॥	... अधीः
शौ ८.३.१–४,६,५,७–१०	१६.६	अथ राक्षोघ्नसूक्तम्
	रक्षोहणं वाजिनम् आ जिघर्मि मित्रं प्रथिष्ठम् उप यामि शर्म ।	रक्षहणं * * जिघर्मि ...
	शिशानो अग्निः क्रतुभिस् समिद्धस् स नो दिवा स रिषः पातु नक्तम् ॥१॥	... दिवं श * * *
[२]शौ अयोदंष्ट्रो	अयोदंष्ट्रान् अर्चिषा यातुधानान् उप स्पृश जातवेदस् समिद्धः ।	अयोदंष्ट्रम् * यातुधानन् ...

	आ जिह्वया मूरदेवान् रभस्व क्रव्यादो वृष्ट्वापि धत्स्वासन् ॥२॥	...दत्स्वासम्
[1]शौ दंष्ट्रौ	उभोभयाविन्न् उप धेहि दंष्ट्रा हिंस्रश् शिशानो ऽवरं परं च ।	* * देहि * हिंसश्...
	उतान्तरिक्षे परि याह्य् अग्ने जम्भैस् सं धेह्य् अभि यातुधानान् ॥३॥	* पर्याह्य् * * * धेह्य् अपि यातुधानाम्
	अग्ने त्वचं यातुधानस्य भिन्द्धि हिंस्राशनिर् हरसा हन्त्व् एनम् ।	* * यातुधानास्य...हन्त्य् *
	प्र पर्वाणि जातवेदश् शृणीहि क्रव्यात् क्रविष्णुर् वि चिनोत्व् एनम् ॥४॥	* फर्वाणि ... व किनोभ्य् *
	यज्ञैर् इषूस् संनममानो अग्ने वाचा शल्यां अशनिभिर् दिहानः ।	* * सन्नवमानो * * शल्यमशनिर्भिर् *
	ताभिर् विध्य हृदये यातुधानान् प्रतीचो बाहून् प्रति भङ्ग्ध्य् एषाम् ॥५॥	* विद्य * यातुधानां * बाहूप्रतिभङ्धत्य् *
[1]शौ यत्रेदानीं	उतेदानीं पश्यसि जातवेदस् तिष्ठन्तम् अग्न उत वा चरन्तम् ।	उत्वेदानीं ...
[4]शौ अस्ता । शौ पदकोशेषु सर्वा अपि	उतान्तरिक्षे पतन्तं यातुधानं तम् अस्त्वा विध्य शर्वा शिशानः ॥६॥	* पतन्त्रं ... विद्धि सर्वा
[1]एवं शौ	उतारब्धान् स्पृणुहि जातवेद उतारेभाणां ऋष्टिभिर् यातुधानान् ।	उतालब्ध्वा * जातवेदो तारेभाणा जुष्टिर् यातुधानां
	अग्ने पूर्वो नि जहि शोशुचान आमादः क्ष्विङ्कास् तम् अदन्त्व् एनीः ॥७॥	* * * * शंसिशाना मार क्षङ्कास् त्वम् इद-
[2]शौ यातुधानो य * कृणोति	इह प्र ब्रूहि यतमस् सो अग्ने यो यातुधान इदं कृणोषि ।	* * ब्रूह्...यातुधानो * * [न्त्व् एनी
[4]शौ रन्धयैनम्	तम् आ रभस्व समिधा यविष्ठ नृचक्षसश् चक्षुषे रन्धयैतम् ॥८॥	...रन्धयेदम्
	तीक्ष्णेनाग्ने चक्षुषा रक्ष यज्ञं प्राञ्चं वसुभ्यः प्र णय प्रचेतः ।	
[3]शौ हिंस्रं * * शोशुचानं	हिंस्रो रक्षांस्य् अभि शोशुचानो मा त्वा दभन् यातुधाना नृचक्षः ॥९॥	* * अत्यभि * * * दभं * *
[1]शौ परि पश्य	नृचक्षा रक्षः प्रति पश्य विक्षु तस्य त्रीणि प्रति शृणीह्य् अग्रा ।	...श्रीर्णा * श्रुणीह्य् *
	तस्याग्ने पृष्टीर् हरसा शृणीहि त्रेधा मूलं यातुधानस्य वृश्च ॥१०॥ ॥का° १॥	तस्याग्नि पृष्टी हिरमा श्रुणीहि ... वृश्चः
शौ ८.३.११-१४,१८,१५,१७, [१६,१९,२०	१६.७	
	त्रिर् यातुधानः प्रसितिं त एत्व् ऋतं यो अग्ने अनृतेन हन्ति ।	स्त्रिरं * प्रसितं ते त्रितं * * * *
[4]शौ कोशेषु भूयिष्ठं नि युङ्ग्धि	तम् अर्चिषा स्फूर्जयन् जातवेदस् समक्षम् एनं गृणते नि वृङ्धि ॥१॥	
	यद् अग्ने अद्य मिथुना शपातो यद् वाचस् तृष्टं जनयन्त रेभाः ।	...शफाचो * वादस् तिष्टं जनयन्तु रेभा
	मन्योर् मनसश् शरव्या जायते या तया विध्य हृदये यातुधानान् ॥२॥	* मनसाश् शध्य...विद्धि * यातुधानाम्
	परा शृणीहि तपसा यातुधानान् पराग्ने रक्षो हरसा शृणीहि ।	प्रा राष्णीह * यातुधानां परौग्ने ...
	परार्चिषा मूरदेवान् शृणीहि परासुतृपश् शोशुचतश् शृणीहि ॥३॥	पुरोर्निषा सूरदेवश् * परामितप सोसजत *
	पराद्य देवा वृजिनं शृणन्तु प्रत्यग् एनं शपथा यन्तु सृष्टाः ।	...शृणोतु ... [यातुधानां
	वाचास्तेनं शरव ऋच्छन्तु मर्मन् विश्वस्यैतु प्रसितिं यातुधानः ॥४॥	वात्रास्तेनं सर्व * मर्म विश्वस्येति प्रसितं
[2]शौ पृतनासु जिग्युः	सनाद् अग्ने मृणसि यातुधानान् न त्वा रक्षां[सि] पृतनासु जह्रुः ।	* * मृडत यातुधानां * * * पृतनासि जिह्रू
[3]शौ सहमूरान् अनु दह	अनु दह सहमूरान् क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः ॥५॥	* दा सापूरां क्रव्याधो ...
	यः पौरुषेयेण क्रविषा समङ्क्ते यो अश्व्येन पशुना यातुधानः ।	...यातुधानां
	यो अघ्न्याया भरति क्षीर[म् अ]ग्ने तेषां शीर्षाणि हरसापि वृश्च ॥६॥	* * भरत .. वृश्चे
	संवत्सरीणं पय उस्रियाया[स्] तस्य माशीद् यातुधानो नृचक्षः ।	...तस्या * * नृचक्षाः
[4]शौ विध्य मर्मणि	पीयूषम् अग्ने यतमस् तितृप्सात् तं प्रत्यञ्चम् अर्चिषा विध्य मर्मन् ॥७॥	* * * तितृस्सास् त्वं * * विधि शर्मन
शौ यातुधाना भरन्ताम् आ [वृश्चन्ताम्	विषं गवां यातुधानाः पिबन्त्व् आ मृच्यन्ताम् अदितये दुरेवाः ।	.. पिबन्त्व् * मृद्यन्ताम्
	परैणान् देवस् सविता ददातु परा भागम् ओषधीनां जयन्ताम् ॥८॥	परीणां ...
	त्वं नो अग्ने अधराद् उदक्तस् त्वं पश्चाद् उत रक्षा पुरस्तात् ।	* * अग्नि दधराद् ...
	प्रति त्ये ते अजरासस् तपिष्ठा अघशंसं शोशुचतो दहन्तु ॥९॥	पदि * * अधराश्चस्य पृष्ठा मघशंसं * देहन्तु
[1]शौ अधराद् उतोत्तरात् कविः	पश्चात् पुरस्ताद् अधराद् उदक्तः कविः काव्येन परि पाह्य् अग्ने ।	
[4]शौ मर्ता	सखा सखायम् अजरो जरिम्णे [अ]ग्ने मर्त्यां अमर्त्यस् त्वं नः ॥१०॥ ॥का° २॥	
	१६.८	
शौ ८.३.२१ पश्यसि	तद् अग्ने चक्षुः प्रति धेहि रेभे शफारुजो येन पश्यासि ? यातुधानान् ।	...शफारुजं * पश्यामि यातुधानां
	अथर्ववज्[ज्] ज्योतिषा दैव्येन सत्यं धूर्वन्तम् अचितं न्य् ओष ॥१॥	...अदिति * ओषा
शौ २२	परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि ।	...महस्व *
शौ धृषद्वर्णं ... भङ्गुरावतः	भिषग्वर्णं ? दिवेदिवे हन्तारं भङ्गुरावतम् ॥२॥	... °वता
शौ २४ ऋ ५.२.९	वि ज्योतिषा बृहता भात्य् अग्निर् आविर् विश्वानि कृणुते महित्वा ।	...कृणुते महित्वा
एवं ऋ । [4]शौ रक्षोभ्यो विनिक्ष्वे	प्रादेवीर् मायास् सहते दुरेवाश् शिशीते शृङ्गे रक्षसे विनिक्षे ॥३॥	* * सहतये दुरेवाश् शृङ्ग * विरक्षये
शौ २६ ऋ ७.१५.१०	अग्नी रक्षांसि सेधति शुक्रशोचिर् अमर्त्यः ।	अग्ने ...

	शुचिॅ पावक ईड्यः ॥४॥	
शौ नास्ति । ऋ ७.१५.१३	अग्ने रक्षा णो अंहसॅ प्रति ष्म देव रीषतः ।	...ष्मा * *
	तपिष्ठैर् अजरो दह ॥५॥	
शौ २५	ये ते शृङ्गे अजरे जातवेदस् तिग्महेती ब्रह्मसंशिते ।	ए ..तिग्मशंसी ब्रह्मशंसिते
¹शौ प्रत्यञ्चम् अर्चिषा जातवेदो	ताभ्यां दुर्हार्दम् अभिदासन्तं किमीदिनं प्रत्यञ्चं यातुधानं जातवेदो वि निक्ष्व ॥६॥	* दुहार्दसविदासंत किमीदिवं * * * नृचक्षः
ऋ १०.८७.२३ । शौ २३ प्रति	विषेण भङ्गुरावतस् सम् इन्द्रो रक्षसो दह ।	विषेणं * मम् इन्द्र ...
शौ * तिग्मेन ... [स्म रक्षसो जहि	अग्ने शुक्रेण शोचिषा तपुरग्राभिर् अर्चिभिः ॥७॥	...तपुरग्रेअभिर् *
शौ नास्ति । ऋ २४	प्रत्यङ् अग्ने मिथुना दह यातुधाना किमीदिना ।	
	सं त्वा शिशामि जागृह्य् अदब्धं विप्र मन्मभिः ॥८॥	* * शुचामि चमृहय् अदुग्धं * मन्वभिः
शौ नास्ति । ऋ २५	प्रत्य् अग्ने हरसा हरश् शृणीहि विश्वतॅ प्रति ।	...शृणीहि विश्वत *
	यातुधानस्य रक्षसो बलं वि रुज वीर्यम् ॥९॥	यातुधानस्य ...
शौ नास्ति	¿ सादान्वेयं प्र मृण रक्ष इन्द्र यातुधानं क्षीणैर् मूरैः ? ।	...यातुधान क्षीणैर् मूरैः
	या तवाग्ने मिथुना यातुधाना विष्वञ्चौ लुप्तौ हरसा शयाथाम् ? ॥१०॥	* तवग्ने मिथुना यातुधानाम् * रसौ * *
पै १५.११.१	बृहस्पतिर् नॅ [परि पातु पश्चाद् उतोत्तरस्माद् अधराद् अघायोः ।	बृहस्पतिन् न इत्य् एका
	इन्द्रॅ पुरस्ताद् उत मध्यतो नस् सखा सखिभ्यो वरिवॅ कृणोतु] ॥११॥ ॥का ३॥	
शौ ८.४.१-३,५,४,६-१० ऋ ७.[१०४.१-३,५,४,६-१०	**१६.९**	
	इन्द्रासोमा तपतं रक्ष उब्जतं न्य् अर्पयतं वृषणा तमोवृधः ।	इन्द्रासोमा * * तब्जातं न्यर्पयतं वृषाण *
	परा शृणीतम् अचितो न्य् ओषतं हतं नुदेथां नि शिशीतम् अत्रिणः ॥१॥	* शीह सदितो न्योहतं * नदेथां न्य * *
	इन्द्रासोमा सम् अघशंसम् अभ्य् अघं	इन्द्रसोमा * अघशंसम् * अघं
शौ अग्निमाँ इव	तपुर् ययस्तु चरुर् अग्निवाँ इव ।	तपुर् यियस्तु चरुर् अग्निवां *
	ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तम् अनवायं किमीदिने ॥२॥	ब्रह्मद्विषे ...अनवायं *
	इन्द्रासोमा दुष्कृतो वव्रे अन्तर् अनारम्भणे तमसि प्र विध्यतम् ।	इन्द्रासोमा दुष्कृते वव्रे अन्तर् अनारम्भणे...
¹शौ यतो नैषां ऋ यथा नातः	अथैषां नातः पुनर् एकश् चनोदयत् तद् वाम् अस्तु सहसे मन्युमच् छवः ॥३॥	(अथैषां न्यातः * * चनोदय * वाम् अस्तु (मामिमं मन्युमश् छवः [अस्यमभिः
शौ ऋ ...युवम् *	इन्द्रासोमा वर्तयतं दिवस् पर्य् अग्नितप्तेभिर् दिवो अश्मह्नन्मभिः ।	इन्द्रसोमा वर्तयतं * * अग्नितप्तेभिर् दिवो
	तपुर्वधेभिर् अजरेभिर् अत्रिणो नि पर्शाने विध्यतं यन्तु निस्स्वरम् ॥४॥	तपु र्वैधभिर् अजरेभिर् * * पर्शान विध्यतं यज [निस्स्वरं
¹शौ ऋ * वर्तयतं दिवो	इन्द्रासोमा प्र हरतं दिवो वधं सं पृथिव्या अघशंसाय तर्हणम् ।	
	उत् तक्षतं स्वर्यं पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः ॥५॥	... पर्वतेभ्य एन * वृवधानं निर्जवतः
	इन्द्रासोमा परि वां भूतु विश्वत इयं मतिॅ कक्ष्याश्वेव वाजिना ।	
¹शौ ऋ जिन्वतम्	यां वां होत्रां परिहिणोमि मेधयेमा ब्रह्माणि नृपती [इ]व हिन्वतम् ॥६॥	* * * प्रहिणोमि मेधेमा ...
	प्रति स्मरेथां [तु]जयद्भिर् एवैर् हतं द्रुहो रक्षसो भङ्गुरावतः ।	* स्मोरेतां * एभिर् अर्थ ... भङ्गुरावताः
¹ऋ यो नः ... द्रुहा	इन्द्रासोमा दुष्कृते मा सुगं भूद् यो मा कदाचिद् अभिदासति द्रुहुः ॥७॥	* * * शुगम् * * * * अपिकाचिदु द्रुहूः
	यो मा पाकेन मनसा चरन्तम् अभिचष्टे अनृतेभिर् वचोभिः ।	...अतिष्टे निर्ऋतेभिर् *
	आप इव काशिना संगृभीता असन्न् अस्त्व् आसत इन्द्र वक्ता ॥८॥	...आशंन् अस्ताशन * *
	ये पाकशंसं विहरन्त एवैर् ये वा भद्रं दूषयन्ति स्वधाभिः ।	...पूपयन्ति *
	अहये वा तान् प्रददातु सोम आ वा दधातु निर्ऋतेर् उपस्थे ॥९॥	* * * ददाति * आराद् अराति * *
	यो नो रसं दिप्सति पित्वो अग्ने यो अश्वानां यो गवां यस् तनूनाम् ।	...श्वानं * * * *
¹शौ ऋ नि ष हीयतां तन्वा	रिपुस् स्तेनस् स्तेयकृ[द्] दभ्रम् एत्व् अनु विश्यतां तन्वा तना च ॥१०॥ ॥का ४॥	रिपु स्तेन ...
शौ ८.४.११-१८,२०,१९	**१६.१०**	
	परस् सो अस्तु तन्वा तना च तिस्रॅ पृथिवीर् अधो अस्तु विश्वाः ।	...अस्य निश्वा
	प्रति शुष्यतु यशो अस्य देवा यो मा दिवा दिप्सति यश् च नक्तम् ॥१॥	* शुष्यति ...
	सुविज्ञानं चिकितुषे जनाय सच् चासच् च वचसी पस्पृधाते ।	* चिकितुषे जानाय... पचती पस्पृशाते

	तयोर् यत् सत्यं यतरद् ऋजीयस् तद् इत् सोमो अ[व]ति हन्त्य् आसत् ॥२॥	
[1]शौ वृजिनं हिनोति	न वा उ सोमो वृजिनं शृणोतु [न] क्षत्रियं मिथुया धारयन्तम् ।	…व्रजिनं…
	हन्ति रक्षो हन्त्य् आसद् वदन्तम् उभाव् इन्द्रस्य प्रसितौ शयाते ॥३॥	हन्त रिक्षं…प्रशितौ शयते
	यदि वाहम् अनृतदेवो अस्मि मोघं वा देवां अप्यूहे अग्ने ।	* * अनृतरेवो…देवौ * *
	किम् अस्मभ्यं जातवेदो हृणीषे द्रोघवाचस् ते निर्ऋथं सचन्ताम् ॥४॥	…हृदणीषे * थे अनृतं *
	अद्या मुरीय [यदि] यातुधानो अस्मि यदि वायुस् ततप पूरुषस्य ।	* मुदैर् * अस्मै वद् * तदपि पौरुषस्य
	अधा स वीरैर् दशभिर् वि यूया यो मा मोघं यातुधानेत्य् आह ॥५॥	
	यो मायातुं यातुधानेत्य् आह यो वा रक्षाश् शुचिर् अस्मीत्य् आह ।	…मा * * * *
	इन्द्रस् तं हन्तु महता वधेन विश्वस्य जन्तोर् अधमस् पदीष्ट ॥६॥	* तो…वजीष्ठ: [गूहमानां
	प्र या जिगाति खर्गलेव नक्तम् अप द्रुहुस् तन्वं गूहमाना ।	* * जिघातं खर्गलेवि निक्तम् * द्रुहस् *
	वव्रं अनन्तं अव सा पदीष्ट ग्रावाणो घ्नन्तु रक्षस उपब्दैः ॥७॥	वव्री अनन्तौ…
[1]शौ विक्ष्व् इच्छत	वि तिष्ठध्वं मरुतो विक्ष्व् ईप्सत गृभायत रक्षसस् सं पिनष्टन ।	* जिष्ठध्वं * * अप्सित गृहांयतत * * बनिष्टन:
	वयो ये भूत्वा पतयन्ति नक्तभिर् ये वा रिपो दधिरे देवे अध्वरे ॥८॥	* * * * * य…
	एत उ त्ये पतयन्ति श्वयातव इन्द्रं दिप्सन्ति दिप्सवो अदाभ्यम् ।	अत उत् ते * स्वातव…अदाभ्या
	शिशीते शक्रः पिशुनेभ्यो वधं नूनं सृजद् अशनिं यातुमद्भ्यः ॥९॥	* * पृशनेभ्यो…अशनं यातुमध्वा:
	प्र वर्तय दिवो अश्मानम् इन्द्र सोमशितं मघवन् सं शिशाधि ।	…इन्द्रस् * मघवी शी *
	प्राक्तो अपाक्तो अधराद् उदक्तो अभि जहि रक्षसः पर्वतेन ॥१०॥	परागतो अपागतो दधाद्…
	॥का° ५॥	
शौ ८.४.२१-२५	१६.११	
	इन्द्रो यातूनाम् अभवत् पराशरो हविर्मथीनाम् अभ्य् आविवासताम् ।	* याभूनाम्…हविर्मतीनाम् * आयवासतां
	अभी[द्] उ शक्रः परशुर् यथा वनं पात्रेव भिन्दन् सत एतु रक्षसः ॥१॥	…भिन्दं सृजेतु *
	उलूकयातुं शु[शु]लूकयातुं जहि श्वयातुम् उत कोकयातुम् ।	* * * श्वयातिम्…
	सुपर्णयातुम् उत गृध्रयातुं दृशदेव प्र मृण रक्ष इन्द्र ॥२॥	सुपर्णयातिम्…दृशेव…इन्द्रं
[1]शौ अपोच्छन्तु * * किमीदिनः	मा नो रक्षो अभि नड् यातुमावद् अपोछन्तां मिथुना ये किमीदिनाम् ।	…अपोश्छतं * या *
	पृथिवी नः पार्थिवात् पात्व् अंहसो अन्तरिक्षं दिव्यात् पात्व् अस्मान् ॥३॥	…पार्थिवान्…न्तरिक्षां…
	इन्द्र जहि पुमांसं यातुधानम् उत स्त्रियं मायया शाशदानाम् ।	…पुमांमो * अत * मिथुना शासदानां
	विग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन् सूर्यम् उच्चरन्तम् ॥४॥	व्यग्रीवासो * रुजंत…दृशं…
	प्रति चक्ष्व वि चक्ष्वेन्द्रश् च सोम जागृतम् ।	…जागृतु
	रक्षोभ्यो वधम् अस्यतम् अशनिं यातुमद्भ्यः ॥५॥ ॥का° ६॥ ॥अनु° २॥	…अस्यचम् अशनं *
		इति षोडशकाण्डे द्वितीयो नुवाकः ॥
शौ ८.७.१-१०	१६.१२	
	या बभ्रवो याश् च शुक्रा रोहिणीर् उत पृश्नयः ।	* * या…उक्र् पृष्ण्य:
	असिक्नीः कृष्णा ओषधीस् सर्वा अच्छावदामसि ॥१॥	…ओश्छावदामसि
[1]शौ देवेषिताद् अधि	त्रायन्ताम् इमं पुरुषं यक्ष्माद् देवहिताद् अधि ।	…एधि
	यासां द्यौः पिता पृथिवी माता समुद्रो मूलं वीरुधां बभूव ॥२॥	यासा…
	आपो [अ]ग्रं दिव्या ओषधयः ।	
	तास् ते यक्ष्मम् एनस्यम् अङ्गादङ्गाद् अनीनशन् ॥३॥	…अनीनशं
	प्रस्तृणती स्वम्बिनीर् एकशुङ्गाः प्रतन्वतीर् ओषधीर् आ वदामि ।	प्रस्तरणती स्तम्भिनीर् एकशृङ्गः प्रधन्वतीर्…
	अंशुमतीः काण्डिनीर् या विशाखा ह्वयामि ते वीरुधो वैश्वदेवीर् उग्राः पुरुषजीवनीः ॥४॥	…ह्वयामि… °जीविनीर्
[भेषजम्	यद् वस् सहस् सहमाना वीर्यं यच् च वो बलम् ।	
[4]शौ मुञ्चतौपधीरथो कृणोमि	तेनेमम् अस्माद् यक्ष्मात् पुरुषं मुञ्चन्त्व् ओषधीः ॥५॥	…मुञ्चत्व् ओषधी
शौ * * * ओषधीमहम्	जीवलां नघारिषां जीवन्तीम् उत ।	
[4]शौ मधुमतीमिह हुवे ऽस्मा	अरुन्धतीम् उन्नयन्तीं पुष्पां मधुमतीं हुवे ॥६॥	
[अरिष्टतातये	इहा यन्तु प्रचेतसो मेदिनीर् वचसो मम ।	य इहा यन्ति * * * *
	यथेमं पारयामसि पुरुषं दुरिताद् अधि ॥७॥	अथैमं…
	अग्नेर् घासो अपां गर्भो या रोहन्ति पुनर्णवाः ।	…पुनर्नवः
[3]शौ सहस्रनाम्नीर्	ध्रुवास् सहस्रधाम्नीर् भेषजीस् सन्त्व् आभृताः ॥८॥	ध्रुवस् * भेषजैस् * आभृता:

	अवकोल्वा उदकात्मान ओषधयः ।	अथकोल्वा उदकात्मानम् *
	व्यृ ऋषन्तु दुरितं तीक्ष्णशृङ्ग्यः ॥९॥	वर्षन्त * °शृङ्ग्या
	उन्मुञ्चन्तीर् वि[व]रुणा उग्रा या वि[ष]दूषणीः ।	
शौ रक्षोनाशनीः नास्ति	अथो बलासनाशनी रक्षोनाशनी× कृत्यादूषणीश् च यास् ता इहा यन्त्व् ओषधीः ॥१०॥ ॥का° १॥	* °नाशिनी: * * * यः... अषधीः
शौ ८.७.११-१६,१८,१९,१७, [२०,२१	**१६.१३**	
शौ शिवास्ते सन्त्वोषधीः नास्ति	शिवास् ते सन्त्व् ओषधीर् अपक्रीतास् सहीयसीर् वीरुधो या अभिष्टुताः ।	...अपक्रीयताः...
शौ अपां * ज्येष्ठा नास्ति। अग्रे च त्रायन्तामस्मिन् ग्रामे गाम् ...	अपां सरस्वती ज्येष्ठा त्रायन्ताम् अस्माकं गाम् अश्वं पुरुषं पशुम् ॥१॥	अपा ...
[२]शौ बभूव	मधुमन् मूलं मधुमद् अग्रम् आसां मधुमन् मध्यं वीरुधां बलेन ? ।	* * * अग्धम् आसं ...
शौ मधोः संभक्ता * * घृतमन्नं दुहतां *	मधुमत् पर्णं मधुमत् पुष्पम् आसां मधोस् संभूता अमृतस्य भक्षो घृतमद् दुह्रते गोपुरोगवम् ॥२॥	* * * * आसं... दुहते *
	यावती× कियतीश् चेमा× पृथिव्याम् अध्य् ओषधीः ।	* केतीश् ...
[३]शौ ता मा	ता नस् सहस्रपर्ण्यो मृत्योर् मुञ्चन्त्व् अंहसः ॥३॥	
	वैयाघ्रो मणिर् वीरुधां त्रायमाणो ऽभिशस्तिपाः ।	व्याघ्रोर् * वीरुधा * भिशस्तिपात्
	अमीवास् सर्वा रक्षांस्य् अप हन्त्व् अधि दूरम् अस्मत् ॥४॥	...अस्मात्
[२]शौ * * सं विजन्ते	सिंहस्येव स्तनथोर् ओषधीनाम् ? अग्नेर् इव विजन्त आभृताभ्यः ।	* स्तनिदोर्...वृजन्त्व् अवृताभ्यः
[४]शौ अतितुत्तो	गवां यक्ष्म× पुरुषाणां वीरुद्भिर् जनभ्यो ? नाव्या एतु स्रोत्याः ॥५॥	...नांव्या यति स्रोत्या
	मुमुचाना ओषधयो अग्नेर् वैश्वानराद् अधि ।	ममुदाना * अग्ने...
	भूमिं संतन्वतीर् इत यासां राजा वनस्पतिः ॥६॥	भूम्योस् * अथो ...
	याश् चाहं वेद वीरुधो याश् च पश्यामि चक्षुषा ।	
	अज्ञाता जानीमश् च या यासु विद्म च संभृतम् ॥७॥	*. जानीमसि यासि विद्मि *
	सर्वास् समग्रा ओषधीर् बोधन्तु वचसो मम ।	...ओषधी त्वोधन्तु ...
एवं शौ	[यथेमं पारयामसि पुरुषं दुरिताद् अधि] ॥८॥	
	या रोहन्त्य् आङ्गिरसी× पर्वतेषु समेषु च ।	* रोहत्य् ...समेपु *
शौ वीरुधो विश्वभेषजीः नास्ति	वीरुधो विश्वभेषजीस् ता न× पयस्वतीश् शिवा ओषधीस सन्तु शं हृदे ॥९॥	* विश्वभेषजी * नो मयस्वतीश् ...
	अश्वत्थो दर्भो वीरुधां सोमो राजामृतं हविः ।	* भर्भो वीरुधं ...
	व्रीहिर् यवश् च भेषजौ दिवस् पुत्राव् अमर्त्यौ ॥१०॥	व्रीहेर् यवस्य भेषजो ...अमृत्युम्
	उज् जिहीध्वे स्तनयत्य् अभिक्रन्दत्य् ओषधीः ।	* जीध्रय * अभिक्रन्दन्त्य् *
	यदा व× पृश्निमातर× पर्जन्यो रेतसावति ॥११॥ ॥का° २॥	* * पृष्णिमातर× ...
	१६.१४	
शौ ८.७.२२ पाययामसि	तस्यामृतस्येमं बलं पुरुषं फलयामसि ? ।	
	अथो कृणोमि भेषजं यथासच् छतहायनः ॥१॥	... छताहायना
शौ २३ [अस्मा अवसे हुवे	वराहो वेद वीरुधं नकुलो वेद भेषजीम् ।	अराहो ... भेषजीत्
शौ सर्पा गन्धर्वा या विदुस् ता	गन्धर्वास् सर्पा या विदुस् ता इहा यन्त्व् ओषधीः ॥२॥	
शौ २४	यास् सुपर्णा आङ्गिरसीर् दिव्या या रघटो विदुः ।	या सुपर्णाङ्गिरसीर् ...वघटो *
	वयांसि हंसा या विदुर् याश् च सर्वे पतत्रिणः ।	... विदु ...
	मृगा या विदुर् ओषधीस् ता अस्मा अवसे हुवे ॥३॥	* * वनिर् * तास्माम् * *
शौ २५[१.२]	यावतीनाम् ओषधीनां गाव× प्राश्नन्त्य् अघ्न्या यावतीनाम् अजावयः ।	...अग्नयोः * *
शौ २६[३.४]	तावतीर् विश्वभेषजीर् आ भरामि त्वाम् अभि ॥४॥	तावती...इति
शौ २६[१.२]	यावतीषु मनुष्या भेषजं भिषजो विदुः ।	
शौ २५[३.४] ओषधीः शर्म यच्छन्त्वा-[भृताः	तावतीस् तुभ्यम् आभृताश् शर्म यच्छन्त्व् ओषधीः ॥५॥	* * आतृभाश् ...
शौ २७	पुष्पवती× प्रसूमती× फलिनीर् अफला उत ।	* प्रसुमतः...
	संमातर इव दुह्राम् अस्मा अरिष्टतातये ॥६॥	संमातरैव...
शौ २८ अथो दशशलाद्	उ[त्] त्वाहार्षं पञ्चशलाद् उ[त्] त्वा दशशलाद् उत ।	* त्वाहारिषं ...

शौ अथो यमस्य * विश्वस्माद् [देवकिल्बिषात्	उ[त] त्वा यमस्य पड्वीशाद् ओषधीभिर् अपीपरम् ॥७॥ ॥का° ३॥	
	१६.१५	
शौ १०.४.१	इन्द्रस्य प्रथमो रथो देवानाम् अपरो रथो वरुणस्य तृतीय इत् ।	* * रथमोरथो ... यिक्
	अहीनाम् अपमा रथस् स्थाणुम् आरद् अथार्षत् ॥१॥	* उपमा ... आरर् अथारिषत्
शौ २[१.३] परुषस्य वारः	दर्भश् शोचिस् तरूणकम् अश्वस्य वार× पुरुषस्य वारः ।	
शौ २[३] ३[४] (वार् उग्रम्)	रथस्य बन्धुरम् अहीनाम् अरसं विषं वार इद् उग्रम् ॥२॥	* बन्धुर्व् ...
शौ ४ अरंघुषो	उदाङ्घको ? [निम]ज्योन्मज्य पुनर् अब्रवीत् ।	
[४]शौ वार् उग्रम्	उदप्लुतम् इव दार्व् अहीनाम् अरसं विषं वार इद् उग्रम् ॥३॥	उत्प्लुतम् * दाव् ...
शौ ३	अव श्वेत पदा जहि पूर्वेण चापरेण च ।	* श्येतु परा ...
[४]शौ वार् उग्रम्	उदप्लुतम् इव दार्व् अहीनाम् अरसं विषं वार इद् उग्रम् ॥४॥	उतत्प्लुतम् ...
शौ ५ कसर्णीलं	पैद्वो हन्ति कषर्णीलं ? पैद्वश् श्वित्रम् उतासितम् ।	... चित्रम् उदासितम्
	पैद्वो रथर्व्याश् शिरस् सं बिभेद पृदाकाः ॥५॥	पैपैद्वो रथवृद्या * स पिवेत् प्रजाकुम्
शौ ६	पैद्व प्रेहि प्रथमो ऽनु त्वा वयम् एमसि ।	* पेहि * न ...
	अहीन् [व्य् अ]स्यतात् पथो येन स्मा वयम् एमसि ॥६॥	अहिं स्यचात् * वयम् अस्माद् * *
शौ ७	इदं पैद्वो अजायतेदम् अस्य परायणम् ।	* पैद्व अजायत इदम् * *
	इमान्य् अर्वत× पदाहिघ्न्यो वाजिनीवतः ॥७॥	इमात्य् अर्वर परा हखगनयो *
शौ ८	संयतं न वि ष्परद् व्यात्तं न सं यमत् ।	* * * पतरतद् वयातं ...
	अस्मिन् क्षेत्रे द्वाव् अही स्त्री च पुमांश् च ताव् उभाव् अरसा ॥८॥	* * * * * * पुमासस् था * *
शौ ९	अरसास इहाहयो ये अन्ति ये च दूरके ।	अरसासं याहयो * न्ती ...
	घनेन हन्मि वृश्चिकम् अहिं दण्डेनागतम् ॥९॥	* हन्वि * अहं *
शौ १० उभयोः स्वजस्य च	अघाश्वस्येदं भेषजम् उभयो[र्] वृश्चिकस्य च ।	अघासय्येदं ...
	इन्द्रो मे ऽहिम् अघायन्तम् अहिं पैद्वो अरन्धयत् ॥१०॥ ॥का° ४॥	* माह्यम् * अहं * अरुन्धयत्
शौ १०.४.११-२०	१६.१६	
	पैद्वस्य मन्महे वयं स्थिरस्य स्थिरधाम्नः ।	* मत्सहे * स्थिरश्च *
[३]शौ पश्चा	इमे पश्चात् पृदाकव× प्रदीध्यत आसते ॥१॥	* * प्रदाकव× प्रदीच्युतासते
	नष्टासवो नष्टविषा हता इन्द्रेण वज्रिणा ।	नष्टासो नष्टाहविषा ...
	जघानेन्द्रो जघ्निमा वयम् ॥२॥	* जघनिमा *
	हतास् तिरश्चिराजयो निपिष्टास× पृदाकवः ।	... निविष्टास× *
[३]एवं शौ	दर्विं करिक्रतं श्वित्रं दर्भेष्व् असितं जहि ॥३॥	द्रव्यं कनिक्रदं चित्रं ...
[१]शौ खनति	कैरातिका कुमारिका सका खनतु भेषजम् ।	ऋों * * सखा * *
	हिरण्ययीभिर् अभ्रिभिर् गिरीणाम् उप सानुषु ॥४॥	हिरण्येभिर् अभिद् * * साधिषु
	आयम् अगन् युवा भिषक् पृश्निहापराजितः ।	अयम् अगंन् इवा * पृष्णि°
	स वै स्वजस्य जम्भन उभयोर् वृश्चिकस्य च ॥५॥	... जम्भनम् ...
[१]शौ मे ऽहिम् अरन्धयन् [पृदाकुं च पृदाक्वम्	इन्द्रो मे ऽहीन् अजम्भयन् मित्रश् च वरुणश् च ।	... अजम्भयं ...
	वातापर्जन्योभा ॥६॥	
शौ इन्द्रो मे ऽहिम् अरन्धयत्	पैद्वो मे ऽहीन् अजम्भयत् पृदाकूंश् च पृदाकवः ।	... अजम्भयं प्रदाकूश् * प्रदाकवः
शौ स्वजं	हतास् ? तिरश्चिराजिं कसर्णीलं दशोनसिम् ॥७॥	* थिरश्चराजीं कुशिन्नीलं नशोनशीम्
	इन्द्रो जघान प्रथमं जनितारम् अहे तव ।	इन्द्र ...
[३]शौ तेषाम् उ	तेषां वस् तृह्यमाणानां कस् स्वित् तेषाम् असद् रसः ॥८॥	* * * कस्य त्यषाम् * रूषा
	सं हि शीर्षाण्य् अग्रभं पौञ्जिष्ठ इव कर्वरम् ।	* * शीर्षण्य् * सौञ्जुष्ठीव *
	सिन्धोर् मध्यं परेत्य व्य् अनिजम् अहेर् विषम् ॥९॥	* * परेत्य ...
	अहीनां सर्वेषां विषं परा वहन्तु सिन्धवः ।	* * विरं ...
	हतास् तिरश्चिराजयो निपिष्टास× पृदाकवः ॥१०॥ ॥का° ५॥	* तिरश्चराजयो निविष्टास× प्रदाकवः
	१६.१७	
शौ १०.४.२१	ओषधीनाम् अहं वृण उर्वरीर् इव साधुया ।	... ऊर्वरीर् साध्लया
	नयाम्य् अर्वतीर् इवाहे निरैतु ते विषम् ॥१॥	* अर्वतीव् इवा अहे * * *

शौ २२	यद् अग्नौ सूर्ये विषं पृथिव्याम् ओषधीषु यत् ।	... उषधीषु *
[४]शौ ऐतु ते विषम्	कान्दाविषं कनक्ककं निर् ऐत्व् ऐतु ते अहे ॥२॥	* कनिक्रदं ... एतु * वही
शौ २५	अङ्गादङ्गात् प्र च्यावय हृदयं परि वर्जय ।	... हृदयो * *
	अधा विषस्य यत् तेजो अवाचीनं तद् एतु ते ॥३॥	... दद् * *
शौ नास्ति	अग्ने त्रायस्व द्विपदं नयेमं पुनर् धेहि जीवसे जातवेदः ।	* * विपदं ...
	मा ते हेडांसि दुरिताव गन्माहिर् वधीद् द्विषत× पुरुषं नः ॥४॥	* * * * गन्म अहिर् * * पोरुषं *
शौ २३ । [१]शौ ये अप्सुजा	ये अग्निजा ओषधि[जा] अहीनां ये अभ्रजा विद्युत आवभूवुः ।	* * * अहिनां * * विद्युताबभूवुः
[३]शौ बहुधा महान्ति	येषां जातानि बहुधा बहूनि तेभ्यस् सर्पेभ्यो नमसा विधेम ॥५॥	तासां ... सर्वेभ्यो * *
शौ २४	तौदी नामासि कन्या घृताची नाम वा असि ।	
[३]शौ ते पदम्	अधस्पदेन ते पदोर् आ ददे विषदूषणम् ॥६॥	.. विश्वदूपणं
शौ २६	आरे [अ]भूद् विषम् अरौद् विषे विषम् अप्राग् अपि ।	* * * अरो * * अप्रयाग् *
शौ अग्निर् विषम् अहेर् निर् अधा-	अग्निर् अहेर् निर् अधाद् विषं सोमो निर् अणयीद् विषम् ।	* हेन् निद् * विशं * अनृणैः * द्विपम्
एवं शौ [त् सोमो निर् अणयीत्	[दंष्टारम् अन्व् अगाद् विषम्] अहिर् अमृत ॥७॥ ॥का° ६॥ ॥अनु° ३॥	अहीर् अमृतः
शौ ८.९.१–१०	१६.१८	
	कुतस् तौ जातौ कतमस् सो अर्ध×	
	कस्माल् लोकात् कतमस्या× पृथिव्याः ।	... कतरस्याः *
	वत्सौ विराजस् सलिलाद् उद् ऐतां	वत्सो ... ईतां
एवं शौ	तौ त्वा पृच्छामि कतरेण दुग्धा ? ॥१॥	दत् * * * दृष्ट्वा
	यो [अ]क्रन्दयत् सलिलं महित्वा योनिं कृत्वा त्रिभुजं शयानः ।	... माहित्वा योनि * त्यभिजं शयानं
	वत्स× कामदुघो विराजस् [स] गुहा चक्रे तन्व× पराचैः ॥२॥	वत्सा कामधुगो विराजो डहा * तन्वाः पराचेः
शौ यानि त्रीणि ... वियुनक्ति *	यानि चत्वारि बृहन्ति येषां चतुर्थं [वियु]नक्तु वाचम् ।	... चतुर्थी * *
	ब्रह्मैनद् विद्यात् तपसा विपश्चिद् यस्मिन्न् एकं [युज्यते यस्मिन्न् एकम्] ॥३॥	ब्राह्मेनतु ...
	बृहत× परि सामानि षष्ठात् पञ्चा[धि] निर्मिता ।	... षष्ठः * निर्मिताः
	बृहद् बृहत्या निर्मितं कुतो ऽधि ? बृहती मिता ॥४॥	... तु * मितः° °
	बृहती परि मात्राया मातुर् मात्राधि निर्मिता ।	
[३]शौ माया ह	माया हि जज्ञे मायाया मायाया मातली परि ॥५॥	
एवं शौ	वैश्वानरस्य प्रतिमोपरि द्यौर् यावद् रोदसी विबबाधे अग्निः ।	* प्रथमोपरि ... रपबाधे ह्यग्ने
[३]शौ यन्ति	ततष् षष्ठाद् आमुतो यन्तु स्तोमा उद् इतो यन्त्य् अभि षष्ठम् अह्नः ॥६॥	* * आमिचो ...
[१]शौ कश्यपेमे	षट् त्वा पृच्छाम ऋषय× कश्यपेदं त्वं [हि] युक्तं युयुक्षे योग्यं च ।	शञ् त पृच्छमि ... योक्षं * *
[४]शौ यतिधा सखिभ्यः	विराजम् आहुर् ब्रह्मण× पितरं तां नो वि धेह्य् ऋतुधा सखिभ्यः ॥७॥	... पित्रं तोन् * * धेहि रुतंदा सिपिभ्यः
	यां प्रच्युताम् अनु यज्ञा× प्रच्यवन्त [उपतिष्ठन्त] उपतिष्ठमानाम् ।	... प्रच्युवन्त्य् उभितिष्ठमाना
एवं शौ	यस्या व्रते प्रसवे [य]क्षम् एजति स विराड् ऋषय× परमे व्योमन् ॥८॥	तस्या व्रजे ... सा ...
[१]शौ अप्राणैति	साप्राणैतु प्राणेन प्राणतीनां विराट् स्वराजम् अभ्य् एति पश्चात् ।	सप्राणैतु प्राण * * सुरात्तम् * एतु *
	विश्वं मृशन्तीम् अभिरूपां विराजं पश्यन्ति त्वे न त्वे पश्यन्त्य् एनाम् ॥९॥	* विभिपन्तीम् अभिरूपां * * ते * * पश्यन्त् *
	को विराजो मिथुनत्वं प्र वेद क ऋतून् क उ कल्पम् अस्याः ।	... ऋतू कौ * *
शौ कतिधा विदुग्धान् ... धाम	क्रमान् को [अ]स्या बहुधा विदुग्धान् को [अ]स्या धामानि कतिधा व्युष्टीः ॥१०॥ ॥का° १॥	क्रिमान ... विदुग्धां ... व्याश्निः
	१६.१९	
पै १.१०४.४ शौ ८.९.११ तै ४.३.११.१ मै २.१३.१० का ३९.१०	इयम् एव सा या प्रथमा व्यौच्छत्	... व्यौश्छत्
शौ आस्व् इतरासु चरति	साप्स्व् अन्तश् चरति प्रविष्टा ।	साप्स्वन्तश् चरति *
शौ ११[४] । पै वधूर् मिमाय	वधूर् जिगाय नवगज् जनित्री	
शौ ११[३] । पै त्रय एनां महिमानस्	महान्तो अस्यां महिमानो अन्तः ॥१॥	महाता अस्या महिमानं इन्तः
शौ १२ तै मै का [सचन्ते	छन्द×पक्षे उषसा पेपिशाने समानं योनिम् अनु सं चरेते ।	* पुसाइं * समानी ...
	सूर्यपत्नी सं चरत× प्रजानती केतुमती अजरे भूरिरेतसा ॥२॥	* * चरति ...

शौ १३ तै मै का	ऋतस्य पन्थाम् अनु तिस्र आगुस् त्रयो घर्मा अनु रेत आगुः ।	* * * तिस्र माहुस् …रेत *
[3]एवं शौ	प्रजाम् एका जिन्वत्य् ऊर्जम् एका राष्ट्रम् एका रक्षति देवयूनाम् ॥३॥	* एका जत्यत्य्… रक्षतुं देवयूनां
शौ १४ तै २ मै का	अग्नीषोमाव् अदधुर् या तुरीयासीद् यज्ञस्य पक्षाव् ऋषयः कल्पयन्तः ।	अग्निष्टोम धुर्या धुर्या धुर्यासीद् * पक्षाम् * *
[4]शौ आभरन्तीम्	गायत्रीं त्रिष्टुभं जगतीम् अनुष्टुभं बृहदर्कीं यजमानाय स्वर् आभरन्तः ॥४॥	गायत्रीं त्रिर्ष्टुभं जगतीम् * बृहदर्कीर् * *
शौ १५ तै ४ मै का	पञ्च [व्यु]ष्टीर् अनु पञ्च दोहा गां पञ्चनाम्नीं ऋतवो ऽनु पञ्च ।	…गां पञ्चनाम्नीं * नु पञ्चं [आभरन्ता
	पञ्च दिशः पञ्चदशेन क्लृप्तास् ता एकमूर्ध्नीर् अभि लोकम् एकम् ॥५॥	… एकमूर्ध्नीर् * लोक एता
शौ १६	षड् जाता भूता प्रथमजा ऋतस्य षड् उ सामानि षडहं वहन्ति ।	… प्रथमजन्तस्य × उस् * षडं *
	षड्योगं सीरम् अनु साम[साम] षड् आहुर् द्यावापृथिवीष् षड् उर्वीः ॥६॥	* शीर्म् अन्…ऊर्वी
शौ १७	षड् आहुश् शीतान् षड् [उ] मास उष्णान् ऋतुं नो ब्रूत यतमो ऽतिरिक्तः ।	औं * * शीतां … उष्णाम् ऋतं … चरिक्तः
	सप्त सुपर्णाः कवयो नि षेदु[स्] सप्त छन्दांस्य् अनु सप्त दीक्षाः ॥७॥	…दीक्षा
शौ १८	सप्त होमास् समिधो नु सप्त मधूनि सप्त ऋतवो नु सप्त ।	* * * न * वधून् …
[4]शौ नास्ति	सप्ताज्यानि परि भूतम् आयन् सप्त होता ऋतुष्या यजन्ति ।	सप्तज्यायां पुरुहूतगायं * * ऋतुद *
	तास् सप्तगृध्रा इति शुश्रवाहम् ॥८॥	* * * यस्सुश्रवाहम्
शौ २१	अष्टौ धामानि प्रथमजा ऋतस्याष्टेन्द्र ऋत्विजो दैव्या ये ।	… प्रथमजन्तस्याष्टेन्द्र * * यै
	अष्टयोनिर् अदितिर् अष्टपुत्राष्टमीं रात्रिम् अभि हव्यम् एति ॥९॥	* अजतर् अष्टपुत्रा अष्टमीं * अपि * *
शौ २२	इत्थं श्रेयो मन्यमानेदम् आगमं युष्माकं सख्ये अहम् अस्मि शेवा ।	* * मन्यमानेत्तम् आगं … सेवा
	समानजन्मा क्रतुर् अस्तु नश् शिवस् स नस् सर्वास् सं चरति प्रजानन् ॥ ॥१०॥ ॥का॰२॥	… अर्वास् * * *

१६.२०

शौ ८.९.२४	केवलीन्द्राय दुदुहे हि गृष्टिर् वशं पीयूषं प्रथमं दुहाना ।	केवली इन्द्राय दधुर् ये गृष्टि वशे * * दुहानां
	अथातर्पयच् चतु[र्]श् चतुर्धा देवान् मनुष्यान् असुरान् अथर्षीन् ॥१॥	अधातल्पशश् …
शौ २३	अष्टेन्द्रस्य षड् यमस्य ऋषीणां सप्त सप्तधा ।	
	अपो मनुष्यान् ओषधीस् तान् उ पञ्चानु सेचिरे ॥२॥	… ओवधीस् तानि पञ्चानि सेजिरे
शौ २५ किमु धाम	को नु गौः क एकऋषिः किम् उ साम का आशिषः ।	का न * * यक॰ …
शौ यक्षं	यक्षं पृथिव्याम् एकवृद् एकऋतुः कतमो नु सः ॥३॥	* * एकव्रज् एकर्तुः * न शः
शौ २६ एकं धामैक॰	एको गौर् एक एकऋषिर् एकं सामैकधाशिषः ।	* * येकेक ऋषिर् * *
शौ यक्षं	यक्षं पृथिव्याम् एकवृद् एकऋतुर् नाति रिच्यते ॥४॥ ॥का॰३॥	* * एकव्रज् एकर्तु * *

१६.२१

शौ ११.४.१	प्राणाय नमो यस्य सर्वम् इदं वशे ।	
	यो भूतस् सर्वस्येश्वरो यस्मिन् सर्वं प्रतिष्ठितम् ॥१॥	
शौ २	नमस् ते प्राण क्रन्दाय नमस् ते स्तनयित्नवे ।	
	नमस् ते ऽस्तु विद्युते नमस् ते प्राण वर्षते ॥२॥	* * * विद्वते …
शौ $४^{१.२}$	यत् प्राण ऋताव् आगते अभिक्रन्दत्य् ओषधीः ।	.. ॰क्रन्दन्त्व् *
शौ $३^{३.४}$	प्र वीयन्ते गर्भान् दधते अथो बह्वीर् वि जायन्ते ॥३॥	* * गर्भं … जायते
शौ $३^{१.}$	यत् प्राण[स्] स्तयित्नुनाभिक्रन्दत्य् ओषधीः ।	* * स्तनयित्नुना अभिक्रन्दन्त्व् *
शौ $४^{३.४}$ [पृथिवीं महीम्	सर्वं तदा प्र मोदते यद् उ किं च भूम्याम् अधि ॥४॥	* ददात् * मोदंते * अ … अधिः
शौ ५ * * अभ्यवर्षीद् वर्षेण	यदा प्राणो अभ्यक्रन्दीद् वर्षेण स्तनयित्नुना ।	
	पशवस् तत् प्र मोदन्ते महो वै नो भविष्यति ॥५॥	पशव प्रस्यत् … भविष्यसि
शौ ६ । [1]शौ कोशेपु अभिवृष्ट्या	अभिवृष्टा ओषधयः प्राणेन सम् अवादिरन् ।	अभिरिष्ट्वा … अवाचिरं
[अपि	आयुर् वै नः प्राचीचरस् सर्वा नस् सुरभीर् अकः ॥६॥	* * न प्राचीनरत् सर्वान्सुरभीर् अक
शौ $८^{१.२}$	नमस् ते [प्राण] प्राणते नमो [अ]स्त्व् अपानते ।	
शौ $८^{४.३.५}$	प्रतीचीनाय ते नमः पराचीनाय ते नमस् सर्वस्मै त इदं नमः ॥७॥	… च * *
शौ ७	नमस् ते [अ]स्त्व् आयते नमो [अ]स्तु परायते ।	
	नमस् ते प्राण तिष्ठत आसीनायोत ते नमः ॥८॥	
शौ ९ । [2]शौ यो ते	या ते प्राण प्रिया तनूर् या ते प्राण प्रेयसी ।	… तनू …
	अथो [य]द् भेषजं तव तस्य नो धेहि जीवसे ॥९॥	
शौ १० प्रजा अनु वस्ते	प्राणः प्रजा अनूपास्ते पिता पुत्रम् इव प्रियम् ।	प्राण प्रजानूपस्ते …

	प्राणो ह सर्वस्येश्वरो यच् च प्राणति यच् च न ॥१०॥ ॥का°४॥	
शौ ११.४.११–२०	१६.२२	
[1]शौ * * प्राणस्तक्मा	प्राणो मृत्यु× प्राणो अमृतं प्राणं देवा उपासते ।	
	प्राणो ह सत्यवादिनम् उत्तमे लोक आ दधत् ॥१॥	…उत्तमो लोका *
	प्राणो विराट् प्राणो देष्ट्री प्राणं सर्व उपासते ।	…प्राणो सर्वम् *
[3]शौ प्राणो ह सूर्यश्चन्द्रमाः	प्राणो ऽग्निश् चन्द्रमास् सूर्य× प्राणम् आहु× प्रजापतिम् ॥२॥	
	प्राणापानौ व्रीहियवाव् अनड्वान् प्राण उच्यते ।	°पानो व्रीह्यवाव्… उचते
	यव ह प्राण आहितो ऽपानो व्रीहिर् उच्यते ॥३॥	येवे * प्राणाहितो * व्रीहि *
	अपानति प्राणति पुरुषो गर्भे अन्तरा ।	…अन्तः
शौ यदा त्वं प्राण जिन्वस्यथ स [जायते पुनः	¿ या वा त्वं प्राण जिन्वः स दम्ब वायसे त्वत् ? ॥४॥	
	प्राणम् आहुर् मातरिश्वानं वातो ह प्राण उच्यते ।	…मातरिश्वान…
[4]शौ सर्वं प्रतिष्ठितम्	प्राणे [ह] भूतं भव्यं च प्राणे सर्वं समा[हि]तम् ॥५॥	…समाताः (उपरि प्रान्ते तम्)
[1]शौ मनुष्यजा उत	आथर्वणीर् आङ्गिरसीर् दैवीर् मनुषजाश् च याः ।	अथर्वणैर् आङ्गिरसैर् देवैर्…
[3]शौ ओषधयः प्र जायन्ते	सर्वा× प्र मोदन्त्व् ओषधीर् यदा त्वं प्राण जिन्वसि ॥६॥	
	यदा प्राणो अभ्यवर्षीद् वर्षेण पृथिवीं महीम् ।	…पृथिवीर् मही
[3]शौ प्र जायन्ते	ओषधय× प्र मोदन्ते [अ]थो या× काश् च वीरुधः ॥७॥	…य * * *
	यस् ते प्राणेदं वेद यस्मिंश् चासि प्रतिष्ठितः ।	* * प्राण इदं…
[3]शौ सर्वे तस्मै	एवा तस्मै बलिं हरान् अमुष्मिन् लोक उत्तमे ॥८॥	यवा * बलि हराम्य्…उत्तमम्
	यदा प्राण बलिहृतस् तुभ्यं सर्वा× प्रजा इमाः ।	* * बलिंरुचस्…
[3]शौ एवा तस्मै । [4]शौ शृणवत् [सुश्रवः	सर्वे अस्मै बलिं हरान् यस् त्वा शुश्राव सुश्रवाः ॥९॥	* यस्मै * हराम्… शुश्रुवुः
	अन्तर् गर्भश् चरति देवतास्व् आभूतो भूतस् स उ जायते पुनः ।	…देवतास् * * सो * *
[3]शो स भूतो भव्यं भविष्यत्	स भूतं भव्यं भुवनं भविष्यत् पिता पुत्रं प्र विवेशा शचीभिः ॥१०॥	
	॥का°५॥	
शौ ११.४.२१–२६	१६.२३	
[1]शौ उच्चरन्	एकं पादं नोत्खिदति सलिलाद् धंस उत्पतन् ।	…अस उत्पपदम्
[3]शौ यदङ्ग स	यदि स तम् उत्खिदे[न्] नैवाद्य न श्वस् स्यात् ।	इमं * * * अह्नैवाच्यनः च्यो
[4]शौ न व्युच्छेत् कदा चन	न रात्री नाहस् स्यान् न प्रज्ञातं तु किं चन ॥१॥	न रात्रीन् नहस्याह× प्रज्ञा * कि *
	अष्टाचक्रं वर्तत एकनेमि सहस्राक्षरं प्र पुरो नि पश्चात् ।	* वर्ततेक° * * मदो * *
[4]शौ कतमः स केतुः	अर्धेन विश्वं भुवनं जजान यद् अस्यार्धं किम् उ तस्य केतुः ॥२॥	अर्धेनि * * * एतस्यार्धं…
[1]शौ विश्वस्य चेष्टतः	यो [अ]स्य विश्वजन्मन ईशे सर्वस्य चेष्टतः ।	* * °जन्मनि ईशि * चेष्ठितः
	अन्येषु क्षिप्रधन्वने तस्मै प्राण नमो ऽस्तु ते ॥३॥	* °धन्वते…
[1]शौ सर्वस्य चेष्टतः	यो [अ]स्य सर्वजन्मन ईशे विश्वस्य चेष्टतः ।	य * °जन्मनि…चेष्ठितः
[4]शौ मानु तिष्ठतु	अतन्द्रो ब्रह्मणा धीर× प्राणो माम् अभि रक्षतु ॥४॥	
[1]शौ सुप्तेषु	ऊर्ध्वस् स्वप्नेषु जागर ननु तिर्यङ् नि पद्यते ।	…त्रियंगु ननुप पद्यते
	न सुप्तम् अस्य सुप्तेष्व् अनु शुश्राव कश् चन ॥५॥	नस् सुप्तस्य सुप्तेष्व् अन मश्चाव * *
	प्राण मा मत् पर्यावृतो न मद् अन्यो भविष्यसि ।	* * वत्…वेद् * *
	अपां गर्भम् इव जीवसे प्राण बध्नामि त्वा मयि ॥६॥ ॥का°६॥ ॥अनु°४॥	
शौ ९.४.१–३,५,४,६,८, [७,९,१०	१६.२४	
	साहस्रस् त्वेष ऋषभ× पयस्वान् विश्वा रूपाणि वक्षणासु बिभ्रत् ।	सहस्रस्…वक्षणासि *
	भद्रं दात्रे यजमानाय शिक्षन् बार्हस्पत्य उस्रियस् तन्तुम् आतान् ॥१॥	…सिक्षं * उषियस् * आताम्
	अपां यो अग्रे प्रतिमा बभूव प्रभूस् सर्वस्मै पृथिवीव देवी ।	* * अग्ने…पृथिवीम *
	पिता वत्सानां पतिर् अघ्न्यानां साहस्रे पोषे अपि न× कृणोतु ॥२॥	…अघ्नानं सहस्रे…
	पुमान् अन्तर्वान् स्थविर× पयस्वा[न्] वसो× कबन्धम् ऋषभो बिभर्ति ।	…ऋषवो पिवन्ति
	तम् इन्द्राय पथिभिर् देवयानैर् हुतम् अग्निर् वहतु जातवेदाः ॥३॥	त्वम् * वैथिभिर्… °वेदः
	देवानां भाग उपनाह एषो ऽपां रस ओषधीनां घृतस्य ।	* * मपानाहेषो * रसीर् * *

[३]शौ सोमस्य भक्षम्	सोमस्य द्रप्सम् अवृणीत शक्रो बृहन्न् अद्रिर् अभव[द् य]च् छरीरम् ॥४॥	* द्रप्सुर् अमृणीत ... अथ ऋभवश् *
	पिता वत्सानां पतिर् अघ्न्यानाम् अथो पिता महतां गर्गराणाम् ।	...अघ्नानां ...
[३]शौ कोशेपु जरायु अपि ॰	वत्सो जरायुः प्रतिधुक् पीयूष आमिक्षा घृतं तद् व् अस्य रेतः ॥५॥	वत्सं * प्रददाः पियूषामुष्या घृतं तर्दस्य रेत
[१]शौ सोमेन पूर्णं	सोमस्य पू[र्णं क]लशं बिभर्षि त्वष्टा रूपाणां जनिता पशूनाम् ।	
शौ प्रजन्व इह या इमा न्य्	शिवास् ते सन्तु ¿ प्रदर्मीः × घ ? अस्मभ्यं स्वधिते [य]च्छ या अमूः ॥६॥	शिवस् ... या सून्
शौ इन्द्रस्यौजो	इन्द्रस्य चौजो वरुणस्य बा[हू अ]श्विनोर् अंसौ मरुताम् इयं ककुत् ।	* चोजौ ... गक्तम्
	बृहस्पतिं संभृतम् एतम् आहुर् ये धीरासः कवयो [ये] मनीषिणः ॥७॥	बृहस्पति ...
	आज्यं बिभर्ति घृतम् अस्य रेतस् साहस्रः पोषस् तम् उ यज्ञम् आहुः ।	... सहस्रपोषस् तन यज्ञावाहुः
[३]शौ ऋषभो	इन्द्रस्य रूपं वृषभो वसानस् सो अस्मान् देवाश् शिव ऐतु दत्तः ॥८॥	...स्मां * शिवैतु धत्तः
	दैवीर् विशः पयस्वान् आ तनोषि त्वाम् इन्द्रं त्वां सरस्वन्तम् आहुः ।	देवीर् * * * तनुभृ ...
	सहस्रं स एकमुखा ददाति यो ब्राह्मण ऋषभम् आजुहोति ॥९॥	सहस्र ...
[१]शौ वयो दधौ	बृहस्पतिस् सविता ते मनो दधौ त्वष्टुर् वायोः पर्य् आत्मा त आभृतः ।	... स्त्वष्टुर् * * आचमहताभृतः
[४]शौ द्यावापृथिवी उभे स्ताम्	अन्तरिक्षे मनसा त्वा जुहोमि बर्हिष् टे द्यावापृथिवी अभूताम् ॥१०॥	... बहिष् * * यभूताम्
	॥का° १॥	
	१६.२५	
शौ ९.४.११ देवेषु गोष्वेति	य इन्द्र इव देवेष्व् एति गोषु विवावदत् ।	ऐन्द्रीव * एषु * युवावद
	तस्य ऋषभस्याङ्गानि ब्रह्मा सं स्तौतु भद्रया ॥१॥	... ब्रह्म ...
शौ १२	पार्श्वे आस्ताम् अनुमत्या भगस्यास्ताम् अनूवृजौ ।	पार्श्वयास्ताम् * भगस्यामस्ताम् अनुव्रजौ
[३]शौ अब्रवीन् मित्रो	अष्ठीवन्ताव् अब्रवीन् मृत्युर् ममैतौ केवलाव् इति ॥२॥	* * मृत्यू मसी केवलाम् *
शौ १३	भसद् आसीद् आदित्यानां श्रोणी आस्तां बृहस्पतेः ।	भजद् ... शोणी यास्तां बृहस्पते
[४]शौ धूनोत्य्	पुच्छं वातस्य देवस्य तेन धूनोत्व् ओषधीः ॥३॥	... यूनोत्व् *
शौ १५[१.२]	क्रोड आसीज् जामिशंसस्य सोमस्य कलशो धृतः ।	पुरोडा × × सशंसस्य * * धृत
शौ १४[३.४] । [४]शौ ऋषभं यद-	उत्थातुर् अब्रुवन् पदो यद् ऋषभं व्यक[ल्पयन्] ॥४॥	इत्था उदब्रुवम् ... विक
शौ १४[१.२] [कल्पयन्	गुदा आसन् सिनीवाल्यास् सूर्यायास् त्वचम् अब्रुवन् ।	गुदागं * * * अब्रुवं
शौ १५[३.४]	देवास् संगत्य यत् सर्वं ऋषभं व्यकल्पयन् ॥५॥	देवात् * * सर्वम् * विकल्पयम्
शौ १६ ॰॰	ते कुष्ठिकास् सरमायै कूर्मेभ्यो अदधुश् शफान् ।	* कुष्ठिकाश् शरमायी * अदितिश् शफां
[४]शौ कोशेपु श्ववर्तेभ्यो अपि	ऊवध्यम् अस्य कीटेभ्यश् शवर्तेभ्यो अधारयन् ॥६॥	उन्मध्यम् * * शिवरत्रेभ्यो अधारयम्
शौ १७ ऋषत्य् अवर्तिं	शृङ्गाभ्यां रक्ष ऋषद् अरातिं हन्ति चक्षुषा ।	* * रिपद् रातीं * *
[३]शौ शृणोति	शृणोतु भद्रं कर्णाभ्यां गवां यः पतिर् अघ्न्यः ॥७॥	...अग्नयः
शौ १८ नैनं दुन्वन्त्य्	शतयाजं स यजते नैनम् ऋण्वन्त्य् अग्नयः ।	सचयादं सेजते * नृण्वन्त्य् *
[३]शौ जिन्वन्ति विश्वे	जिन्वन्तु सर्वे तं देवा यो ब्राह्मण ऋषभम् आजुहोति ॥८॥	
शौ १९ ब्राह्मणेभ्य ऋषभं	ब्राह्मणाय वृषभं दत्त्वा वरीयः कृणुते मनः ।	...वर्युः * *
[४]शौ अव पश्यते	पुष्टिं सो अघ्न्यानां स्वे गोष्ठे वि पश्यतु ॥९॥	* सोमघ्न्यान ...
शौ २०	गावस् सन्तु प्रजास् सन्त्व् अथो [अ]स्तु तनूबलम् ।	...सन्तु रथो * तनूबलिं
[३]शौ तत् सर्वम्	सर्वं तद् अनु मन्यन्तां देवा ऋषभदायिने ॥१०॥ ॥का° २॥	... °दायने
शौ ९.४.२१,२२,२४,२३	**१६.२६**	
शौ इन्द्र इद्रयिं दधातु चेतनीम्	अयं पिपान ¿ इन्द्रियं गयां बिभर्ति तेजनीम् ? ।	मयं पिपाना ...
[४]शौ दुहां	अयं धेनुं सुदुघां नित्यवत्सां वशं दुहे विपश्चितं परो दिवः ॥१॥	...विशं * विपच्यतं पुरो *
	पिशङ्गरूपो नभसो वयोधा ऐन्द्रश् शुष्मो विश्वरूपो न आगन् ।	* * रयोधा इन्द्रश् ... आगं
हि गृ २.१०.५ शौ नाना	प्रजाम् अस्मभ्यं दधतो रयिं च दीर्घायुत्वाय शतशारदाय ॥२॥	
[१]शौ प्रति दध्मो	एतं वो युवानं परि दध्मो [अ]त्र तेन क्रीडन्तीश् चरत वशां अनु ।	... चरति * *
[३]शौ हासिष्ट	मा नो हिंसिष्ट जनुषा सुभागा रायश् च पोषैर् अभि नस् सचध्वम् ॥३॥	* * हिंसिष्टं * सिभागा ...
[१.२]शौ ऋ ६.२८.८ नाना	उपेहोपपर्चनम् [अ]स्मिन् गोष्ठ उप पृञ्चतु ।	उपेहोपपरिचुनो ...
	उप ऋषभस्य यद् रेत उपेन्द्र तव वीर्यम् ॥४॥ ॥का° ३॥	
शौ ८.५.१–१०	**१६.२७**	
	अयं प्रतिसरो मणिर् [वीरो वीराय बध्यते ।	* * मणिस्

	[वीर्यवान्] सपत्नहा शूरवीर॰ परिपाणस् सुमङ्गलः ॥१॥	सपत्नहस् सुवीर॰ परिमाणस् *
	अयं मणिस् सपत्नहा सुवीरस् सहस्वान् वाजी सहमान उग्रः ।	
शौ एति	प्रत्य[क्] कृत्या दूषयन्न् एतु वीरः ॥२॥	* * दूषयेन्न् * वीरा
	अनेनेन्द्रो मणिना वृत्रम् अहन्न् अनेनासुरान् पराभावयन् मनीषी ।	…अहं ननेनासुरात् * *
शौ अनेनाजयद् द्यावापृथिवी उभे	अनेन द्यावापृथिवी उभे अजयद् अनेनाजयत् प्रदिशश् चतस्रः ॥३॥	…अजयज् जनेनाजयत् * *
[1]शौ प्रतीवर्तः प्रतिसरः [इमे	अयं स्राक्त्यो मणि॰ प्रतीवर्धतुम ? प्रतिसरः ।	यो… प्रतिसरा
शौ विमृधो वशी…सर्वतः	ओजस्वान् विमृधो मणिस् सो [अ]स्मान् पातु विश्वतः ॥४॥	…यातु *
	तद् अग्निर् आह तद् उ सोम आह बृहस्पतिस् सविता तद् इन्द्रः ।	* * * * इ… इन्द्राः
शौ ते मे देवाः…प्रतिसरैरजन्तु	ते ते देवा॰ पुरोहिता॰ प्रतीची॰ कृत्या॰ प्रतिसरेणाजन्तु ॥५॥	…कृत्या प्रतिसेरेण जन्तु
शौ उतेमं ब्रह्मणस्पतिं नास्ति	अन्तर् दधे द्यावापृथिवी उताहर् उत सूर्यम् उतेमं ब्रह्मणस् पतिम् ।	…उताहुर् * * उतैवं * *
शौ यथापूर्वम्	ते ते देवा॰ पुरोहिता॰ प्रतीची॰ कृत्या॰ प्रतिसरेणाजन्तु ॥६॥	…कृत्या प्रतिसेरेण जन्तु
	ये स्राक्त्यं मणिं जना वर्माणि कृण्वते ।	* स्रागतिं … वर्मणि *
शौ सूर्य इव दिवम्	सूर्यो दिवम् इवारुह्य वि कृत्या बाधते वशी ॥७॥	
	स्राक्त्येन मणिन ऋषिणेव मनीषिणा ।	स्वागतेन * ऋपदेन *
	अजैषं सर्वा॰ पृतना वि मृधो हन्मि रक्षसः ॥८॥	अजीषं सर्वा … रक्षसा
[1]शौ उत नास्ति	या॰ कृत्या [आ]ङ्गिरसीर् या॰ कृत्या आसुरीर् उत ।	…स्वरीर् *
[2]शौ याः कृत्याः	कृत्या यास् स्वयंकृता या उ चान्येभिर् आभृताः ।	…उश् * आता
एवं शौ	उभयीस् ता॰ परा यन्तु परावतो नवतिं नाव्या अति ॥९॥	उभैईस् * * यन्ति परावति * नाव्याति
[1]शौ अस्मै	अस्मिन् मणिं वर्म बध्नन्तु देवा इन्द्रो विष्णुस् सविता रुद्रो अग्निः ।	
	प्रजापति॰ परमेष्ठी विराड् वैश्वानर ऋषयश् च सर्वे ॥१०॥ ॥का° ४॥	
शौ ८.५.११–१७,१९–२२	१६.२८	
	उत्तमो [अ]स्य् ओषधीनाम् अनड्वान् जगताम् इव व्याघ्रश् श्वपदाम् इव ।	
[4]शौ प्रतिस्पाशनम् अन्तितम्	यम् ऐच्छामाविदाम तं प्रतिस्पाशनम् अब्रुवन् ॥१॥	* ईइछामावदाम तिं प्रतिस्याशनम् *
	स इद् व्याघ्रो भवत्य् अथो सिंहो अथो वृषा ।	* यद्… वृका
[2]शौ अथो सपत्नकर्शनो	सर्वा दिशो वि राजति यो बिभर्तीमं मणिम् ॥२॥	…बिभर्ति इमं *
	नैनं घ्नन्त्य् अप्सरसो न गन्धर्वा न मर्त्याः ।	नैना…
	सर्वा दिशो वि राजति यो बिभर्तीमं मणिम् ॥३॥	
शौ असृजत, त्वा	कश्यपस् त्वाम् असृजत् कश्यपस् त्वां सम् ऐरयत् ।	… तां * ईरय
	अबिभस् त्वेन्द्रो मानुषे बिभ्रत् संश्रेषिणे ऽजयत् ।	अपित्वत्सेन्द्रो * * मास्त्वां शेषिणी जयत् ॥४॥
शौ देवा अकृण्वत	मणिं सहस्रवीर्यं वर्म देवा अबध्नत ॥४॥	
	यस् त्वा कृत्याभिर् यस् त्वा दीक्षाभिर् यज्ञैर् [यस् त्वा] जिघांसति ।	…यज्ञै *
	प्रत्यक् त्वम् इन्द्र तं जहि वज्रेण शतपर्वणा ॥५॥	* तम् इन्द्रं … शतपर्वणा
[1]शौ ओजस्वान्	अयम् इद् वै प्रतीवर्तस् सहस्वान् संजयो मणिः ।	* अद् वै॰ प्रतीवर्चः…
	प्रजां धनं च रक्षतु परिपाणस् सुमङ्गलः ॥६॥	…रक्षसः * *
	असपत्नं नो अधराद् असपत्नं न उत्तरा[त्] ।	* * दराद्…
[1]शौ इन्द्रासपत्नं	इन्द्र पिशाचान् न॰ पश्चाज् ज्योतिश् शूर पुरस् कृधि ॥७॥	इन्द्रा पिशाचं * * ज्योति॰ कर॰ * *
	ऐन्द्राग्नं वर्म बहुलं यद् उग्रं विश्वे देवा नाति विध्यन्ति सर्वे ।	ऐन्द्राग्नं … विद्धन्ति *
शौ तन्मे… यथासानि	तत् ते तन्वं त्रायतां सर्वतो बृहद् आयुष्मान् जरदष्टिर् यथासः ॥८॥	* * तंन्नस … यथासत्
[1]शौ आ मारुक्षद्	आ त्वा रक्षतु ? देवमणिर् मह्या अरिष्टतातये ।	
शौ इमं मेथिम्	इमम् एन्यम् ? अभिसंविशध्वं तनूपानं त्रिवरूथम् ओजसे ॥९॥	* * अविसंविश्वध्वं…
	अस्मिन्न् इन्द्रो नि दधातु नृम्ण[म् इ]मं देवासो अभिसंविशध्वम् ।	…देवासोम् *
	दीर्घायुत्वाय शतशारदायायुष्मान् जरदष्टिर् यथासत् ॥१०॥	* °युष्मां * यथासः
शौ २२[1,2] नास्ति	इन्द्रो बध्नातु ते मणिं जिगीवां अपराजितस् सोमपा अभयंकरो वृषा ।	* * त मणि * * सोमपाम् * वृषात्
[1]शौ सर्वतो	स त्वा रक्षतु सर्वदा दिवा नक्तं च विश्वतः ॥११॥ ॥का° ५॥ ॥अनु° ५॥	
	१६.२९	
शौ ८.८.१	इन्द्रो मन्थतु मन्थिता शक्र[श्] शूर॰ पुरंदरः ।	* * मन्थता …

[२]शौ सेना	यथा हनाम सेनाम् अमित्राणां सहस्रशः ॥१॥	... सहस्रशा
शौ २ कृणोत्वमूम्	पूतिरज्जुर् उपध्मानी पूर्ति सेनां कृणोत्व् इमाम् ।	प्रतिरज्जुर् * बध्नामी प्रतिं * कृणोतु माम्
शौ धूममग्निं परादृश्यामित्रा	अग्निं धूमं परादृश्य हृत्स्व् आ दधतां भयम् ॥२॥	* * पराधृष्व ऋष्व् * * *
शौ ४ हन्त्व्	परुषान् अमून् परुषाह्वः कृणोतु हन्त्य् एनान् वधको वधैः ।	पुरुषान् अमन् पुरुषावः ... एनां ...
[४]शौ संदिताः	क्षिप्रं शर इव भज्यन्तां बृहज्जालेन संचिताः ॥३॥	* शरेव * * सञ्चिता
शौ ३ निः (नि वा) शृणीहि	अमून् अश्वत्थ नि मृणीहि खादामून् खदिराजिरम् ।	* * * म्णीह खादासूत् खदिराचिरम्
शौ ताजद्भङ्ग इव * हन्त्वेनान्	¿ ताद् इत् त भङ्गैव ? भज्यन्तां बृहज्जालेन संचिताः ॥४॥	... सञ्चिता
शौ ५ [वधको वधैः	अन्तरिक्षं जालम् आसीज् जालदण्डा दिशो महीः ।	... मही
शौ * दस्यूनां शक्रः सेनाम् *	तेनाभिधाय सेना इन्द्रो दस्यून् अपावपत् ॥५॥	* मेनम् अन्द्रो * उपावपत्
शौ ७[१.२]	बृह[त्]ते जालं बृहत इन्द्र शूर सहस्रार्घस्य शतवीर्यस्य ।	... शूरस् सहस्रार्घ्यस्य *
शौ ६[२] तेन शत्रूनभि सर्वान् न्युब्ज	तेन न्युब्ज मघवन्न् अमित्रान् शश्वतीभ्यः ॥६॥	तेना ... अमित्रां *
शौ ६[१.२] बृहद् धि ... वाजिनीवतः	बृहत् ते जालं बृहतश् श[क्र]स्य रोचनावत[ः] ।	बृहन् त ...
शौ ७[३.४] अयुतं न्यर्बुदं जघान	तेन शतं सहस्रम् अयुतं जघानेन्द्रो दस्यूनाम् अभिधाय सेनाम् ॥७॥	तेना ... दस्यूवाम् अविधाय *
शौ ८ [शक्रो * * सेनया	अयं लोको जालम् आसीच् छक्रस्य महतो महान् ।	
शौ अमून् तमसा	तेना[ह]म् इन्द्रजालेन तमसामून् अभि दधामि सर्वान् ॥८॥	... चमसामून् अपि * सर्वाम्
शौ ९ व्यृद्धिर्, चानपवाचना	सेदिर् उग्रा विवृत्तिर् ? आर्तिश् चादपवाचिराम् ? ।	स्वेदर् उग्रां ववर्तिर् आन्तिश् *
[४]शौ तैरमून्	श्रमस् तन्द्रीश् च मोहश् च तेनामून् अभि दधामि सर्वान् ॥९॥	समश् चन्द्रीश * मुहश्च मुहश्च तेनमोन् अपि
शौ १०	मृत्यवे अमून् प्र यच्छामि मृत्युपाशैर् अमी सिताः ।	* अमूं प्रेश्छामि * अमे पिता [* सर्वाम्
[४]शौ बद्ध्वा	मृत्योर् ये अघला दूतास् तेभ्य एनान् प्रति नयामि बद्धान् ॥१०॥ ॥का° १॥	* * खाला दूता * एन पृष्ठ नवामि बद्धां
शौ ८.८.११–१५,१८,१६,१७, [१९–२१	१६.३०	
शौ नयतामून् मृत्युदूता	मृत्युदूता अमून् नयत यमदूता अपोम्भत ।	* अमूं * यमूता अपोभतः
	परस्सहस्रा हन्यन्तां तृणेढ्व् एनान् मत्यं भवस्य ॥१॥	°सहस्र * त्रिनेशछूवानां मृत्युं भवस्व
	साध्या एकं जालदण्डम् उद्यत्य यन्त्य् ओजसा ।	* यकं * आदित्यो * ओजनसा
[२]शौ * एकं * एकम्	रुद्रा द्वितीयं वसवस् तृतीयम् आदित्यैर् एक उद्यतः ॥२॥	... एका उद्यता
	विश्वे देवा उपरिष्टा[द्] उब्जन्तो यन्त्व् ओजसा ।	* * * उपजन्त्यो यन्त्य् *
[४]शौ अङ्गिरसो महीम्	मध्येन घ्नन्तो यन्तु सेनाम् अङ्गिरसो वधैः ॥३॥	मध्येनि खनन्तो ...
	वनस्पतीन् वानस्पत्यान् ओषधीर् उत वीरुधः ।	... ओषधीन् अवन्त *
[४]शौ हनन्	द्विपाच् चतुष्पाद् इष्णामि यथा सेनाम् अमूं हताम् ॥४॥	* * धृष्णामि ... अमू *
शौ सर्पान् देवान्	गन्धर्वाप्सरसो देवान् सर्पान् पुण्यजनान् पितॄन् ।	* देवा ...
[४]शौ हनन्	दृष्टां अदृष्टान् इष्णामि यथा सेनाम् अमूं हत ॥५॥	* अदृष्टा वृष्ण्यामि * सेनासमू हतां
	मृत्योर् आषम् आ पद्यन्तां क्षुधं सेदिं वधं भयम् ।	* आयुष्म् ... मेधि * भय:
[२]शौ चाक्षुजालाभ्यां	इन्द्रश् चाक्षुमालाभ्यां शर्व सेनाम् अमूं हतम् ॥६॥	इन्द्रस्याक्षमालाभ्यां सर्व * अमू हताम्
[१]शौ इम उप्ता मृत्युपाशा	मृत्युपाशा इमे युक्ता यान् आक्रम्य न मुच्यसे ।	* यम * यांस क्रमि * *
	अमुष्या हन्तु सेनाया इदं कूटं सहस्रशः ॥७॥	* यन्तु ... सहस्रशं
	घर्मस् समिद्धो अग्निनायं होमस् सहस्रहः ।	* * युग्निना अयं * सहस्रशः
	भवश् च पृश्निबाहुश् च शर्व सेनाम् अमूं हतम् ॥८॥	भगस्य पृष्णिबाहुस् सर्व सेनासमू हताम्
[२]शौ नुत्ता धावत	पराजिताः प्र त्रसतामित्रास् सिता धावत ब्रह्मणा ।	पराजिता * भ्रसितामित्रा * धवतु *
[३]शौ कोशेषु भूयिष्ठं बृहस्पतिप्रणु-	बृहस्पतिः प्रणुत्तानां मामीषां मोचि कश् चन ॥९॥	* * सामैषां सोम * *
[२]शौ मा शकन् [त्तानां	अव पद्यन्ताम् एषाम् आयुधानि मा शिषन् प्रतिधाम् इषुम् ।	... मिषं प्रददाम् उखम्
	अथैषां बहु बिभ्यताम् इषवो घ्नन्तु मर्मणि ॥१०॥	... मर्मंमि
[१]शौ क्रोशताम् एनान्, उभे तु नास्ति	सम् एनान् क्रोशतां द्यावापृथिवी उभे सम् अन्तरिक्षं सह देवताभिः ।	ससेनां क्रोषतां ...
[४]शौ यन्तु	मा ज्ञातारं मा प्रतिष्ठां विदन्त मिथो विघ्नाना उप [य]न्ति मृत्युम् ॥११॥ ॥का° २॥	* * मामा प्रदिष्ठाम् इदंत मथो भिघ्नानाम् * * *
	१६.३१	
शौ ८.८.२२,२३	दिशश् चतस्रो ऽश्वतर्यो देवरथस्य पुरोडाशाश् शफा अन्तरिक्षम् उद्धिः ॥१॥	... पुरोडाशश् शफान्तरिक्षव् उद्धिः
	द्यावापृथिवी पक्षसी ऋतवो ऽभीशवो [ऽन्तर्देशाः किंकरा] वाक् परिरथ्यम् ॥२॥	* * रीतवो * वान् परिरित्यम्

	अहोरात्रे चक्रे मास अरास् संवत्सरो अधिष्ठानम् ॥३॥	* * * आरात्...
शौ २३	विराड् ईषाग्नी रथमुखम् इन्द्रस सव्यष्ठाश् चन्द्रमास् सारथिः ॥४॥	वीराड् ईशाग्नी रथमुपम् * संविष्ठश् * *
शौ २४[१.२]	इतो जयेतो वि जयस्व जय सं जय स्वाहा ॥५॥ ॥का° ३॥	यतो... जाया * झत्य *
	१६.३२	
शौ ९.१.१	दिवस् पृथिव्या अन्तरिक्षात् समुद्राद् अग्नेर् वातान् मधुकशा हि जज्ञे ।	* पृथिव्यान्तरिक्षात् समुद्राग्नेर्वातां...
[४]शौ नन्दन्ति	तां चायित्वामृतं वसानां हृद्भिः प्रजाः प्रति नन्दन्तु सर्वाः ॥१॥	* चाहित्थामृतं * ऋथिभिः पजाः पति रन्दन्तु *
शौ ३। [४]शौ कोशेषु भूयिष्ठं पृथिव्यां	पश्यन्त्य् अस्याश् चरितं पृथिव्याः पृथङ् नरो बहुधा मीमांसमानाः ।	पश्यन्द् अस्याश् वरतं ... मीमांसमानां
	अग्नेर् वातान् मधुकशा हि जज्ञे मरुताम् उग्रा नप्तिः ॥२॥	* वातां ... अनपतिः
शौ २	महद् विश्वरूपं पयो ऽस्यास् समुद्रस्योत त्वा रेत आहुः ।	... समुद्रस्यौतु...
	यत ऐति मधुकशा रराणा तत् प्राणस् तद् अमृतं निविष्टम् ॥३॥	एत यैक * रराणास् * * तन्मृतं दिविष्ठं
शौ ४	मातादित्यानां दुहिता वसूनां प्राणः प्रजानाम् अमृतस्य नाभिः ।	
[४]शौ महान् भर्गश्	हिरण्यवर्णा मधुकशा घृताची महद् भ[र्ग]श् चरति मर्त्येषु ॥४॥	
शौ ५	मधोः कशाम् अजनयन्त देवास् तस्या गर्भो अ[भ]वद् विश्वरूपः ।	* * अजनयन्ति ... विश्वरूपं
[४]शौ भुवना वि चष्टे	तं जातं तरुणं पिपर्ति माता स जातो विश्वा भुवनाभि वस्ते ॥५॥	* * * पिवन्ति * सु जातौ ...
शौ ६,७	कस् तौ प्र वेद क उ तौ जानाति याव् अस्या[स्] स्तनौ सहस्रधाराव् अक्षितौ ।	* * * * का उ तू नाभ ... अक्षतौ
	ऊर्जं दुहाते [अ]नपस्फुरन्तौ ॥६॥	ऊर्जं द्रुहाते *
शौ ६	कस् तं प्र वेद क उ तं चिकेत यो [अ]स्या हृदः कलशस् सोमधानो अक्षितः ।	...तिं चकेत * * हृदः...
		अक्षतः
	ब्रह्मा सुमेधा[स्] सो [अ]स्मिन् मदेत ॥७॥	...देदेता
शौ ८	हिङ्कृण्वती बृहती वयोधा उच्चैर्घोषाभि याति या व्रतम् ।	...उश्चैर्घोषानभि * यां व्राता
	त्रीन् घर्मान् अभि वावशाना मिमाति मायुं पयते पयोभिः ॥८॥	त्रीणि घर्माम् * वावसाना मिमातिमाति * * *
शौ ९ आपः शाक्वरा वृषभा ये [स्वराजः	याम् आपीनाम् उप सीदन्त्य् आपो यां शाक्वरा वृषभा यां स्वराजः ।	* आमीनाम् * * * यानि * मृपभा...
	ते वर्षन्ति ते [वर्षयन्ति तद्विदे कामम् ऊर्जम् आपः ॥९॥	* वर्षयन्तु *
शौ १०	[स्तनयित्नुस् ते वाक् प्रजापते] वृषा शुष्मं क्षिपसि भूम्याम् अधि ।	* युष्मं क्षपसि ...
	अग्नेर् वातान् मधुकशा हि जज्ञे मरुताम् उग्रा नप्तिः ॥१०॥ ॥का° ४॥	* वातां * * ज्ञजशे * * अनपतिं
शौ ९.१.११–१५,१८,१६, [१७,१९,२०	**१६.३३**	
	यथा सोमः प्रातस्सवने अश्विनोर् भवति प्रियः ।	... भवतु *
	एवा मे अश्विना वर्च आत्मनि ध्रियताम् ॥१॥	यवा म भिभवो वर्चामनु ध्रीयताम्
	यथा सोमो द्वितीयसवन इन्द्राग्न्योर् भवति [प्रियः ।	... सवनभ् ऐन्द्राग्नयोर् *
	[एवा म] इन्द्राग्नी वर्च [आत्मनि ध्रियताम्] ॥२॥	ऐन्द्राग्नी वर्चः
	यथा सोमस् तृतीयसवन ऋभूणां भवति प्रियः ।	... ऋतूणां भवतु *
	एवा म ऋभवो वर्च आत्मनि ध्रियताम् ॥३॥	यवा म भिभवो वर्चामनु ध्रीयतां
	मधु जनिषीय मधु वंशिषीय ।	* जनिषी मनु मम्बिक्षीयः
	पयस्वान् अग्न आगमं तं मा सं सृज वर्चसा ॥४॥	* आग्नागमं ...
	सं माग्ने वर्चसा सृज सं प्रजया सम् आयुषा ।	... सम् अयुषा
	विद्युर् मे अस्य देवा इन्द्रो विद्यात् सह ऋषिभिः ॥५॥	* मे अस्य * इन्द्रौ विधात् * ऋपिभिः
एवं शौ	यद् गिरिषु [पर्वतेषु गोष्व् अश्वेषु यन् मधु ।	} यदि गिरिष्य विपां चिर्विपी
	[सुरायां सिच्यमानायां यत् तत्र मधु तन् मयि] ॥६॥	
	यथा मधु मधुकृतस् संभरन्ति मधाव् अधि ।	
	एवा मे [अ]श्विना बलम् ओजश् च ध्रियताम् ॥७॥	यवा...ध्रीयताम्
शौ यथा मक्षा इदं मधु न्यञ्जन्ति [मधावधि	यथा मक्षा ¿ मधुजं मधु ? न्यञ्जन्ति दक्षिणाम् अधि ।	* * मयुञ्जं मयुं न्युंजं * *
	एवा मे अश्विना वर्चस् तेजश् च ध्रियताम् ॥८॥	यवा ... वर्चास् ... ध्रीयतां
	अश्विना सारघेण मा मधुनाङ्क्तं शुभस्पती ।	... मधुवी उतं शुभंस्वती
	यथा वर्चस्वतीं वाचम् आवदानि जनां अनु ॥९॥	... जवे *
शौ स्तनयित्नुस्ते वाक्प्रजापते वृषा शुष्मं क्षिपसि भूम्यां दिवि }	वृषा शुष्मं क्षिपसि भूम्यां दिवो मधो कशया पृथिवीम् अनक्षि ।	* युष्मं क्षपसि...मधोः कशयः * *

[३]शौ दातारं नास्ति । [४]शौ तेनो [सेषमूर्जं पिपर्ति	तां दातारं ? पशव उप जीवन्ति सर्वे तेन वो सेषम् ऊर्जं बिभर्ति ॥१०॥ ॥का°५॥	...शेषम् * *
	१६.३४ .	
शौ ९.१.२१	पृथिवी दण्डो अन्तरिक्षं गर्भो द्यौᳵ कशा विद्युत् प्रकशः ॥१॥	...प्रकामा
शौ मधोः * * घृताची नास्ति	मधोᳵ कशा च घृताची हिरण्ययो बिन्दुः ॥२॥	मधो * चि...
	उर्व्य् असि प्रख्यो ऽस्य् अम्भो ऽसि नभो ऽसि सहो ऽसि ॥३॥	* * प्रह्रो...
	अम्भो मां कृणु नभो मां कृणु सहो मां कृणु ॥४॥	...मा *
	समुद्रो ऽस्य् अक्षतो अपरिमितः ।	...अपरिमिता
	सहस्रमणिस् सहस्रं माम् ऋच्छतु ॥५॥	°मनिस् सहस्र * अइछतु
	यो वै मधुकशायास् सप्त मधूनि वेद सप्त मधुमतीन् ? ॥६॥	...मधोन * * *
शौ २२,२३ नाना	मधुमन्तं लोकं जयति इमध्य् ? अस्मात् तरीयान् भवति ॥७॥	...तारीयं *
शौ २४[१]	यद् वीध्रे स्तनयित्नु तत् प्रजापतिर् एव प्रजाभ्यᳶ प्रादुर् भवति ॥८॥	उज् जीध्रय स्तनयत्नु तत् प्रजापतिर् एव तत् [प्रजापत्यः प्रातुर् *
शौ २४[२] तिष्ठे	तस्मात् प्राचीनोपवीतस् तिष्ठेत् प्रजापते ऽनु मा बुध्यस्वेति ॥९॥	
शौ २४[३]	अन्व् एनं प्रजापतिर् अनु प्रजा बुध्यन्ते य एवं वेद ॥१०॥ ॥का°६॥ ॥अनु°६॥	अन्य्...
	१६.३५	
शौ १०.१.१	यां कल्पयन्ति वहतौ वधूम् इव विश्वरूपां हस्तकृतां चिकित्सवः ।	* * वहतो...
	साराद् एत्व् अप नुदाम एनाम् ॥१॥	* * अपु नरादाम *
शौ २[१.२] नाना	शीर्षण्वतीं नस्वतीं कर्णिनीं कृतां कृत्याकृतां संभृतां विश्वरूपाम् ।	शीर्षण्वणीं नुम्वनीं कर्णनीं * °कृता * *
पै ७.१.५[३.४]	प्रत्यक् प्रतिप्रहिण्मसि यश् चकार तम् ऋच्छतु ॥२॥	* * वृश्...
शौ ३	शूद्रकृता राजकृता [स्त्री]कृता ब्रह्मभिᳵ कृता ।	* °कृनी...
[४]शौ बन्ध्व् ऋच्छतु	जाया पत्या नुत्तेव कर्तारं बन्धुम् ऋच्छतु ॥३॥	* * नुत्वेच * वन्दुम् *
शौ ४ पै ५.२४.६	अनयाहम् ओषध्या [सर्वाᳵ कृत्या अदूदुषम् ।	} अनयाहम् ओषध्ये इत्य् एका
शौ गोषु, पुरुषेषु	[यां क्षेत्रे चक्रुर् यां गोभ्यो यां वा ते पुरुषेभ्यः] ॥४॥	
शौ ५ । [१]शौ अघमस्त्वघकृते'	कृत्यास् सन्तु कृत्याकृते शपथश् शपथीयते ।	...शपथ्यश् शपथ्यंविने
शौ नाना	प्रत्यक् प्रतिप्रवर्तय यश् चकार तम् ऋच्छतु ॥५॥	
शौ ६	प्रतीचीन आङ्गिरसो ऽध्यक्षो नᳶ पुरोहितः ।	प्रतीचीर्...पुरोहिता
	प्रतीचीᳵ कृत्या आकृत्या[मून् कृत्याकृतो जहि ॥६॥	* * कृत्याम्
शौ ७	[यस् त्वोवाच परेहीति प्रतिकूलम्] उदाय्यम् ।	
	तं कृत्ये अभिनिवर्तस्व मास्मान् इच्छो अनागसः ॥७॥	* * अभिनिनिवर्तस्व मास्माद् अइछो *
शौ ८	यस् ते परूंषि संदधौ रथस्येव ऋभुर् धिया ।	* त पुरुष सन्निधौ * दतुर् धियः
	तं गच्छ तत्र ते ऽ[य]नम् अज्ञातस् ते ऽयं जनः ॥८॥	...अज्ञात्स् * अञ् *
शौ ९	ये त्वा कृत्वालेभिरे विद्वला अभिचारिणः ।	यस् * कृत्या° * अभिचारुणः
शौ शंभ्विदं * * पुनःसरं	विद्मेदं कृत्यादूषणं प्रतिवर्त्म प्रतिसरं तेन त्वा स्नपयामसि ॥९॥	* * प्रतीवरत्तम् अप्रतिसरं...
शौ १०	यद् दुर्भगां प्रस्नपितां मृतवत्साम् उपेयिम ।	विद्युर्भगां पृष्णिपथां * उपेयिमः
	अपैतु सर्वं मत् पापं द्रविणं मोप तिष्ठतु ॥१०॥ ॥का°१॥	अमैतु * नत्त * * सोप *
शौ १०.१.११–२०	**१६.३६**	
	यत् ते पितृभ्यो ददतो यज्ञे वा नाम जगृहुः ।	* * पितुभ्यों दधतु यद्दे * * जग्रुहुः
	संदेश्यात् सर्वस्मात् पापाद् इमा मुञ्चन्तु त्वौषधीः ॥१॥	संदेष्यात्...
	देवैनसात् पित्र्यान् नामग्राहात् संदेश्याद् अभिनिष्कृतात् ।	* पित्र्यां °ग्रहात् संदेव्याद् अभिनिष्कृताः
	मुञ्चन्तु त्वा वीरुधो वीर्येण ब्रह्मण ऋग्भिᳶ पयस ऋषीणाम् ॥२॥	* * वीरोधो * * ऋषिमिः...
	यथा वातश् च्यावयति भूम्या रेणुम् अन्तरिक्षाच् चाभ्रम् ।	* वात स्यावयतु...
	एवा मत् सर्वं दुर्भूतं ब्रह्मनुत्तम् अपायति ॥३॥	यवस सत् * * ब्रह्मनन्त्वम् उपायती
	अप क्राम नानदती विनद्धा गर्दभीव ।	* * नादधती अविनद्धाद् *
	कर्तॄन् नक्षस्वेतो नुत्ता ब्रह्मणा वीर्या[व]ता ॥४॥	कर्तून् यक्षः इवेतो नुत्वा * *
	अयं पन्थापि नयामस् त्वा कृत्ये प्रहितां प्रति त्वा प्र हिण्मः ।	* * नयामि * कृत्येषु हित्वां * * * हिणम

	तेनाभि याहि भञ्जत्य् अनस्विनीव वाहिनी विश्वरूपा कुरूटिनी ॥५॥	तेनाभ्याहि तुंजन्य् अनस्विनीवि …
	पराक् ते ज्योतिर् अपथं ते अर्वाग् अन्यत्रास्मद् अयना कृणुष्व ।	पराग ती … एना कृण्वष्व
[४]शौ मा क्षणिष्ठाः	परेणेहि नवतिं नाव्या अति दुर्गास् स्रोत्या मा घानिष्ठाः ? परेणेहि ॥६॥	* नवति नाव्याति दुर्गा स्रोत्या * * परेणहि
	वात इव वृक्षं नि मृणीहि पादय मा गाम् अश्वं पुरुषम् उच् छिष एषाम् ।	वातेव * नृम्णीहि पादे * * * * इश्छिप येषाम्
	कर्तॄन् निवृत्त्येतः कृत्ये अप्रजास्त्वाय बोधय ॥७॥	कर्तुं निर्वर्तयतः …
	यां ते चक्रुर् बर्हिषि यां श्मशाने कृत्यां क्षेत्रे वलगं वा निचख्नुः ? ।	या … या … नितक्षणः
[४]शौ पाकं सन्तं	अग्नौ वा त्वा गार्हपत्ये ऽभिचेरुः पूर्णं सन्तं धीरतरा अनागसम् ।	* गा त्रा * भचेरुः पूर्णा * * नाकसम्
शौ नास्ति	ताम् इतो नाशयामसि ॥८॥	तम् इत *
शौ निखातं	✓ उपाहृतम् अनुबुद्धं निपातं वैरं त्सार्य् अन्व् अविदाम कर्त्रम् ।	उपाहरुतम् * * * स्वार्यं नविदाम कर्तॄन्
	तद् एतु यत आगन् तत्राश्व इव वर्ततां हन्तु कृत्याकृतः प्रजाम् ॥९॥	* एत * आगं तत्राश्वैव …
	स्वायसा [असयो] भवन्ति नो गृहे विद्म ते कृत्ये यतिधा परूंषि ।	स्वयशा भवन्धि तो … निधाः *
	उत् तिष्ठैव परेहीतो ऽज्ञाते किम् इहेच्छसि ।	* तिष्ठेव परीहेतो * * एहेक्षसि
शौ २१[१.२]	ग्रीवास् ते कृत्ये पादौ चापि कर्त्स्यामि निर् द्रव ॥ १०॥ ॥का° २॥	… पादे चाप कृश्छाणि नि द्रवः

१६.३७

शौ १०.१.२१[३.४] * अस्मान्	इन्द्राग्नी एनान् वृश्चतां यौ प्रजानां प्रजापती ।	* एनां * गौः * *
शौ २२ [रक्षतां * * प्रजावती	सोमो राजाधिपा मृडिता च भूतस्य ? नः पतयो मृडयन्तु ॥१॥	* * मृडता ए *तस्य * * मृडायन्तु
शौ नास्ति	भवश् शर्वश् चोभयौ मृडतां नः ॥२॥	भवाश्शर्वाश्चोभयो मृडाता नः इत्येकपदाः
शौ २३ पापकृते कृत्याकृते	भवाशर्वाव् अस्यतां पापकृत्वने कृत्याकृते वा ।	… व
[(वा नास्ति)	दुष्कृते विद्युतं देवहेतिम् ॥३॥	… देवहेति
शौ २४	यद्य् एयथ द्विपदी चतुष्पदी कृत्याकृता संभृता विश्वरूपा ।	* एतद् द्विपदे चतुष्पदे * संभृतां °रूपां
	सेतो ऽष्टापदी भूत्वा पुनः परेहि दुच्छुने ॥४॥	श्वेतो …
शौ २५	अभ्यक्ताक्ता स्वरंकृता सर्वं भरन्ती दुरितं परेहि ।	अभ्यक्तागतास्स्वयंकृतः * * * परंहि
	जानीहि कृत्ये कर्तारं दुहितेव पितरं स्वम् ॥५॥	
शौ २६	परे[हि] कृत्ये मा तिष्ठो विद्धस्येव पदं नय ।	पदे * * धिष्ठो …
[४]शौ न त्वा निकर्तुमर्हति	मृगस् स मृगयुस् त्वं ¿ नक्तात् कर्तुम् ? अर्हसि ॥६॥	मृगस्य * तन् …
शौ नास्ति	अमर्त्यो मर्त्यस् स्वयंकृतं यच् चकाराचिरया ।	* मर्त्यो * यं °चिरया
	हस्ताभ्याम् आत्मने ऽवधीम् ॥७॥	* * वधम्
शौ २७	उत हन्ति पूर्वासिनं प्रत्यादायापर इष्वा ।	* हन्तु पूर्व्यासिनं पत्यारायापदीष्वा
[४]शौ नि हन्त्य्	उत पूर्वस्य निघ्नतो वि हन्त्य् अपरः प्रति ॥८॥	उतो . यन्त्य् * पतिः
शौ २८ अथेहि	एतद् धि श्रृणु मे वचो अपरेहि ? यत एयथ ।	यतद् धृष्णु * * अपरेह्यतयेतः
शौ तं प्रति	यस् त्वा चकार तं पुनः ॥९॥	… दं *
शौ २९[१.२]	अनागोहत्या वै भीमा कृत्ये मा नो गाम् अश्वं पुरुषं वधीः ॥१०॥ ॥का° ३॥	अनागोहत्यं * भीमं …

१६.३८

शौ १०.१.२९[३.४.५]	यत्रयत्रासि निहिता ततस् त्वोत्थापयामसि ।	यत्रयत्रासु नीहता * त्वोत्या°
	पर्णाल् लघीयसी भव ॥१॥	पर्णा लिघीयसी भवा
शौ ३० तमसावृता * इव	यदि स्थ तमसावृता जालेनाभिहिता यूयम् ।	यद् अस्तु * जालेनाभीयता *
	सर्वास् संलुप्येतः कृत्याः पुनः कर्त्रे प्र हिण्मसि ॥२॥	* सल्तुप्पेः कृत्या * कृत्या * *
शौ ३१ कृत्याकृतो वलगिनो	कृत्याकृतां मूलकृताम् अभिनिष्कारिणः प्रजाम् ।	°कृतं °कृतम् °निःकारिणि *
[४]शौ अमून् कृत्याकृतो	मृणीहि कृत्ये मोच् छिषो अमुं कृत्याकृतं जहि ॥३॥	वृणीहि * सुश् …
शौ ३२ मुच्यते तमसस्परि…	यथा सूर्यस् तमसो मुच्यते परि रात्रिं जहात्य् उषसश् च केतुम् ।	* * तपसो * पर राष्ट्रं जहात्व् अघसश् * *
[केतून्	एवाहं सर्वं दुर्भूतं [कर्त्रे कृत्याकृता कृतं] हस्तीव रजो दुरितं जहामि ॥४॥ ॥का° ४॥	यवाहं … रदो *

१६.३९

शौ ९.३.१	उपमितः प्रतिमितो ऽथो परिमितश् च यः ।	* प्रतिमो * परमितश् …

	शालाया विश्ववाराया[स्] ते नद्धानि वि चृतामसि ॥१॥	... नद्धान् * *
शौ २	यत् ते नद्धं विश्ववारे पाशो ग्रन्थिश् च यः [कृ]तः ।	
	बृहस्पतिर् इवाहं बलं वाचा वि स्रंसयामि तत् ॥२॥	बृहस्पतिं वद्दं * * * स्रंसियामि *
शौ ३	आ ययाम सं बबर्ह ग्रन्थींश् चकार ते दृढान् ।	* यामि * विवर्हों ग्रन्थि ... दृढं
	परूंषि विद्वान् शस्तेवेन्द्रेण वि चृतामसि ॥३॥	* विद्वांय ...
शौ ५	संदंशानां पलदानां परिष्वञ्जल्यस्य च ।	संदंसानां पलिदानां परिष्वञ्चंनदस्य *
	सर्वा मानस्य पत्नि ते नद्धानि वि चृतामसि ॥४॥	... नद्धान् * *
शौ ४	वंशानां ते नहनानां प्राणाहस्य तृणस्य च ।	अंशानां * नाहवामि ...
	पक्षाणां विश्ववारे ते नद्धानि वि चृतामसि ॥५॥	... त नद्धान् * *
शौ ६	यानि ते अन्तश् शिक्यान्य् आबेधू रण्याय कम् ।	* च * * आमेधो न्त्याय *
	प्र ते ता वि चृतामसि सर्वा मानस्य पत्नि न उद्धिता तन्वे भव ॥६॥	* चे * * * * * पत्न्या नु उद्धयता तत्वे *
शौ ७	हविर्धानम् अग्निशालं पत्नीनां सदनं सदः ।	
	सदो देवानाम् असि देवि शाले ॥७॥	सनो ...
शौ ८	अक्षुम् ओपशं विततं सहस्राक्षं विषूवति ।	यक्ष्मोपिशं * * विपुवति
[३]शौ अवनद्धम् अभिहितं	अपिनद्धम् अपिहितं ब्रह्मणा वि चृतामसि ॥८॥	* * ब्रह्मणश् च ऋतामसि
शौ ९	यश् च त्वा प्रति गृह्णाति येन चासि मिता त्वम् ।	यश् चित्रा प्रति गृह्णातु तेन आशसिता *
	उभौ मानस्य पत्नि तौ जीवतां जरदष्टी ॥९॥	
शौ १० नद्धा परिष्कृता	अमुत्रैनम् आ गच्छताद् दृढा नद्धापिनिष्ठिता ।	अमित्रैनभ् * गइछतां त्रिधा °ष्ठता
	तस्यास् ते वि चृतामस्य् अङ्गमङ्गं परुष्परुः ॥१०॥ ॥का°५॥	
	१६.४०	
शौ ९.३.१४	अग्निम् अन्तश् छादयसि पुरुषान् पशुभिस् सह ।	* * छादेसि ...
	विजावति प्रजावति वि ते पाशांश् चृतामसि ॥१॥	... ति * *
शौ १६	ऊर्जस्वती घृतवती पृथिव्यां निमिता मिता ।	... नमिता मिता:
[४]शौ प्रतिगृह्णतः	विश्वान्नं बिभ्रती शाले मा हिंसीः प्रतिगृभ्णतः ॥२॥	विश्वानं * शाला * * पगृभ्णतः
शौ ११	यस् त्वा पूर्वो निमिमाय संजभार वनस्पतीन् ।	... निममाय * वानस्पतीं
	प्रजायै चक्रे त्वा शाले परमेष्ठी प्रजापतिः ॥३॥	प्रजाये ... परमैष्ठी *
शौ १२	नमस् तस्मै नमो दात्रे शालापतये च कृण्मसि ।	* तस्यै ...
	नमो अग्नये प्रचरते पुरुषाय च ते नमः ॥४॥	... ज * *
शौ १३[१.२]	गोभ्यो अश्वेभ्यो नमो यच् छालायां विजायते ।	
शौ १५[१.२]	अन्तरा द्यां च पृथिवीं च यद् व्यचस् तेन शालां प्रति गृह्णामि त इमाम् ॥५॥	... पृथिवी * * वदस् तेना * * * तैमा
शौ १५[३-५]	यद् अन्तरिक्षं रजसो विमानं तत् कृण्व उदरं शेवधिभ्यः ।	... कृणु * शेवलिभ्यः
शौ तेन	यच् ? छालां प्रति गृह्णामि तस्मै ॥६॥	
शौ १७	तृणैर् आवृता पलदान् वसाना रात्रीव शाला जगतो निवेशनी ।	तृणैपावृता पलदां ... निवेशिनी
	मिता पृथिव्यां तिष्ठसि हस्तिनीव पद्वती ॥७॥	... हस्तिनीवि *
शौ २१	या द्विपक्षा चतुष्पक्षा षट्पक्षा या निमीयते ।	
	अष्टापक्षां दशपक्षां शालां मानस्य पत्नीम् अग्निर् गर्भ इवा शये ॥८॥	* * शाला मानस्व पत्निम् * * * से
शौ १८	इटस्य ते वि चृताम्य् अपिनद्धम् अपोर्णुवन् ।	... चृतामासिम् अपिनदसपूर्णवां
	वरुणेन समुब्जितां मित्रः प्रातर् व्य् उब्जतु ॥९॥	* समुपिजता * * व्यभजतु
शौ २०	कुलाये ऽधि कुलायं कोशे कोशस् समुब्जितः ।	... समुपजितः
	तत्र मर्त्यो वि जायते यस्माद् विश्वं प्रजायते ॥१०॥ ॥का°६॥	... प्रजायसे
	१६.४१	
[१]शौ ९.३.१९[२]	चतुस्स्रक्तिं परिचक्रां कविभिर् निमितां मिताम् ।	* * कविभिन् नसिता सितां
[३]शौ १६[३] । [४]शौ १९[४]	विश्वान्नं बिभ्रतीं शालां अमृतौ सोम्यं सदः ॥१॥	विश्वान बिभ्रती * अमृतो सौम्यां मतः
शौ २४ भव	मा नः पाशान् प्रति मुचो गुरुर् भारो लघुर् भवः ।	
	वधूम् इव त्वा [शा]ले यत्रकामं भरामसि ॥२॥	
शौ २३ प्र भरामि	इमा आपः प्र हराम्य् अयक्ष्मा यक्ष्मनाशनीः ।	... अक्ष्म्या यक्ष्मनाशिनी
	गृहान् अभि प्र सीदाम्य् अमृतेन सहाग्निना ॥३॥	

शौ २२	प्रतीचीं त्वा प्रतीचीनश् शाले प्रैम्य् अहिंसतीम् ।	* * प्रतीचीनि * प्रहिं प्रहिंसतीं
	अग्निर् ह्य् अन्तर् आपश् च ऋतस्य प्रथमा द्वाः ॥४॥	* हिंददापश्चन्तस्य प्रथमोभा
शौ २५[२.१]	स्वाहा देवेभ्यस् स्वाह्येभ्यः ।	...स्वायेभ्यः
	प्राच्या दिशश् शालाया नमो महिम्ने ॥५॥	प्रच्या दिशश् ...
शौ २६[१.१]	स्वाहा देवेभ्यश् स्वाह्येभ्यः ।	... स्वाहायेभ्यः
	दक्षिणस्या दिशश् शालाया नमो महिम्ने ॥६॥	
शौ २७[२.१]	स्वाहा देवेभ्यस् स्वाह्येभ्यः ।	...स्वाहेभ्य×
	प्रतीच्या दिशश् शालाया नमो महिम्ने ॥७॥	प्रतीच्यां ...
शौ २८[२.१]	स्वाहा देवेभ्यस् स्वाह्येभ्यः ।	.. स्वाहेभ्यो
	उदीच्या दिशश् शालाया नमो महिम्ने ॥८॥	दीच्यां ...
शौ २९[२.१]	स्वाहा देवेभ्यस् स्वाह्येभ्यः ।	...स्वाहेभ्यो
	ध्रुवाया दिशश् शालाया नमो महिम्ने ॥९॥	
शौ ३०[२.१]	स्वाहा देवेभ्यस् स्वाह्येभ्यः ।	... स्वाहेभ्यो
	ऊर्ध्वाया दिशश् शालाया नमो महिम्ने ॥१०॥	दिर्ध्वाया ...
शौ ३१[२.१]	स्वाहा देवेभ्यस् स्वाह्येभ्यः ।	... स्वाहेभ्यो
	दिशोदिशश् शालाया नमो महिम्ने ॥११॥ ॥का° ७॥ ॥अनु° ७॥	
		इति पड्तसूक्तम्
शौ १०.६.१–७,९	१६.४२	
	अरातीयोर् भ्रातृव्यस्य दुर्हार्दो द्विषतश् शिरः ।	अी रात्रीयोर् * द्रुहार्दो ...
	प्र वृश्चाम्य् एनद् ओजसा ॥१॥	* वृश्चावीनम् *
	वर्म मह्यम् अयं मणि× फाला[ज्] जात× करिष्यति ।	चर्म मय्याम् ...
	तृप्तो मन्थेन मागमद् रसेन सह वर्चसा ॥२॥	... रथेन * *
[१]शौ वास्या	य[त्] त्वा शिक्व× परावधीत् तक्षा हस्तेन वाश्या ।	... तक्ष * वाच्या
	आपस् त्वा तस्माज् जीवला× पुनन्तु शुचयश् शुचिम् ॥३॥	* तास् ...
शौ हिरण्यस्रग् । [१]शौ नास्ति	हिरण्यश्रृङ्गो ? ऽयं मणिर् दधन् नो वस्व् अदातिम् ? ।	हिरण्यशृङ्ग * * द्राहम् ..
	श्रद्धां यज्ञं महो दधत् गृहे वसति नो ऽतिथिः ॥४॥	... दधति ...
	तस्मै घृतं सुरां मध्व् अ[न्नम]न्नं क्षदामहे ? ।	... अंनं खनामहे
	स न× पितेव पुत्रेभ्यश् श्रेयश्श्रेयश् चिकित्सतु ।	...श्रयश्श्रयश् चिश्चिकित्सतु
	[भूयोभूयश् श्वश्श्वो] देवेभ्यो मणिर् एत्य ॥५॥	देवभ्यो * अभ्य:
शौ यम् अबध्नात् (एवम् उत्तरत्र)	इमं वध्नातु बृहस्पतिर् मणिं फालं घृतश्चुतम् उग्रं खदिरम् ओजसे ।	भूयोभूयस्यश्वस् * * * * ॥६॥ इमं वध्नाद्वृहस्पतिः मणि फालं घृतश्चुतमुग्रं खदिरमोजसे भूयोभूयश्च स्वस्तेना ॥७॥
	भूयोभूयश् श्वश्श्वस् तेन त्वं द्विषतो जहि ।	
	तम् अग्नि× प्रत्य् अमुञ्चताज्या[य] रसाय कम् ।	त्वम्...
	सो ऽस्मा आज्यं दुहे ॥६॥	
	[इमं वध्नातु बृहस्पतिर् मणिं फालं घृतश्चुतम् उग्रं खदिरम् ओजसे ।	
	[भूयोभूयश् श्वश्श्वस् तेन त्वं द्विषतो जहि ।]	
	तम् इन्द्र× प्रत्य् अमुञ्चतौजसे वीर्याय कम् ।	त्वम् ..
	सो ऽस्मै बलम् इद् दुहे ॥७॥	... वहे
	[इमं वध्नातु बृहस्पतिर् मणिं फालं घृतश्चुतम् उग्रं खदिरम् ओजसे ।	
	[भूयोभूयश् श्वश्श्वस् तेन त्वं द्विषतो जहि ।]	
	तं सूर्य× प्रत्य् अमुञ्चत तेनेमा अजयद् विशस् सो ऽस्मै वर्च इद् [दुहे] ॥८॥ ॥का° १॥	त्वं ... विषः ...
	१६.४३	
शौ १०.६.८	[इमं वध्नातु बृहस्पतिर् मणिं फालं घृतश्चुतम् उग्रं खदिरम् ओजसे ।	
	[भूयोभूयश् श्वश्श्वस् तेन त्वं द्विषतो जहि ।]	

	तं सोम॰ प्रत्य् अमुञ्चत द्रविणाय रसाय कम् ।	त्वं...
	सो ऽस्मै मह इद् [दुहे] ॥१॥	* * मह् *
शौ १०	[इमं बध्नातु बृहस्पतिर् मणिं फालं घृतश्चुतम् उग्रं खदिरम् ओजसे ।	
	[भूयोभूयश् श्वश्श्वस तेन त्वं द्विषतो जहि ।]	
	तं बिभ्रच् चन्द्रमा मणिम् असुराणां पुरो ऽजयद् दानवानां हिरण्ययीः ।	त्वं ... हिरण्ययी
	सो ऽस्मै तेज इद् दुहे ॥२॥	... वहे
शौ १५	[इमं बध्नातु बृहस्पतिर् वाताय मणिम् आशवे ।]	
	तं राजा वरुणो मणिं प्रत्य् अमुञ्चत शंभुवम् ।	त्वं...
	सो ऽस्मै राज्यम् [इद्] दुहे भूयोभूयश् श्वश्श्वः ।	* स्मा ...
	[तेन त्वं द्विषतो जहि] ॥३॥	
शौ नास्ति	[इमं बध्नातु बृहस्पतिर् वाताय मणिं आशवे ।]	
	तं त्वष्टा प्रत्य् अमुञ्चत प्रजाभ्यो वीर्याय कम् ।	त्वं ...
	सो ऽस्मै रूपम् इद् दुहे [भूयोभूयश् श्वश्श्वः ।	... वह
	[तेन त्वं द्विषतो जहि] ॥४॥	
शौ १२	[इमं बध्नातु बृहस्पतिर् वाताय मणिम् आशवे ।]	
	तेनेमां मणिना कृषिम् अश्विनाव् अभि रक्षतः ।	तेनेमा * * अश्नाम् * रक्षतु
	स भिषग्भ्यां पयो दुहे [भूयोभूयश् श्वश्श्वः ।	* निग्भ्यां ...
	[तेन त्वं द्विषतो जहि] ॥५॥	
शौ १३	इमं बध्नातु बृहस्पतिर् वाताय मणिम् [आशवे] ।	
	[तं बिभ्रत् सविता मणिं] तेनेदम् अजयत् स्वः ।	तेवेदम् * स्वत्
	सो ऽस्मै सूनृतां दुहे [भूयोभूयश् श्वश्श्वः ।	
	[तेन त्वं द्विषतो जहि] ॥६॥	
शौ १६,१४	[इमं बध्नातु बृहस्पतिर् वाताय मणिम् आशवे ।]	
	तं देवा बिभ्रतो मणिं सदा धावन्त्य् अक्षिताः ।	... मणियौं * * अक्षतास्
	स एभ्यो अमृतं दुहे [भूयोभूयश् श्वश्श्वः ।	साभ्योम् * *
	[तेन त्वं द्विषतो जहि] ॥७॥	
शौ १४,१६	[इमं बध्नातु बृहस्पतिर् वाताय मणिम् आशवे ।]	
	तम् आपो बिभ्रतीर् मणिं सर्वान् लोकान् युधाजयन् ।	मणि । यं सर्वां लोकां निधाजयं
	स आभ्यो जितिम् इद् दुहे [भूयोभूयश् श्वश्श्वः ।	सोभ्यो * * वहे
	[तेन त्वं द्विषतो जहि] ॥८॥	
शौ १७	[इमं बध्नातु बृहस्पतिर् वाताय मणिम् आशवे ।]	
	तम् इमं देवता मणिं तुभ्यं दधतु भर्तवे ।	... मणि तुभ्यो * *
	[अ]सौ ते भूतिम् इद् दुहे भूयोभूयश् [श्वश्श्वः] ।	* * भूतम् * वहां भूयोभूयस्य
	तेन त्वं द्विषतो जहि ॥९॥ ॥का॰ २॥	स्वेन...

१६.४४

शौ १०.६.१९	अन्तर्देशा अबध्नत प्रदिशस् तम् अबध्नत ।	* बध्नत॰ * * अबध्नत॰
	प्रजापतिसृष्टो मणिर् द्विषतस् सो ऽधरां अकः ॥१॥	°पतिस्सृष्टी मणि द्विषतो...
शौ १८	ऋतवस् तम् [अबध्नतार्तवास् तम्] अबध्नत ।	... अबध्नतस्
	संवत्सरस् तं बद्ध्वा सर्वं भूतं वि राजति ॥२॥	... भूतिं * राजंती
शौ २०	अथर्वाणो [अ]बध्नताथर्वणा अबध्नत ।	* बध्नत आथर्वाणा बध्नतः
	अङ्गिरसस् तं बध्नन्ति दस्यूनां बिभिदुः पुरः ॥३॥	आङ्गिरस्तरतं बद्धांभि * विवदः पुराः
शौ २१	तं धाता प्रत्य् अमुञ्चत स भूतं व्य् अकल्पयत् ।	त्वं * प्रति मुञ्चत सु भूता न्य् *
	तेन त्वं द्विषतो जहि ॥४॥	
शौ २३	इमं बध्नातु बृहस्पतिर् देवेभ्यो असुरक्षितिम् ।	... °क्षतिं
	स त्वायं मणिर् आगमत् सह गोभिर् अजा[वि]भिर् अन्नेम प्रजया सह ॥५॥	... अन्येन * *
शौ २५	[इमं बध्नातु बृहस्पतिर् देवेभ्यो असुरक्षितिम् ।	
	[स त्वायं मणिर्] आगमन् मधोर् घृतस्य धारया कीलालेन श्रिया सह ॥६॥	अगमन्...केलालेन * *
शौ २६	इमं बध्नातु बृहस्पतिर् देवेभ्यो असुरक्षितिम् ।	... °क्षतिं

	[स त्वा]यं मणिर् आगमद् ओजसा तेजसा सहसा भूत्या द्रविणेन श्रिया सह ॥७॥	अयं ...
	यस्य लोका इमे त्रयः पयो दुग्धम् उपासते ।	
	स त्वायम् अभि रक्षतु मणि[श्] श्रैष्ठ्याय मूर्धतः ॥८॥	...श्रेष्ठाय मूर्धता
	स त्वायं शतदक्षिणो मणि[श्] श्रैष्ठ्याय जिन्वतु ।	...श्रेष्ठाअ *
	यं देवाः पितरो मनुष्या उपजीवन्तु सर्वदा ॥९॥	
	तस्मै त्वा यज्ञवर्धन मणे प्रत्य् अमुञ्चं शिवम् ।	...मणेः...
	तं त्वां शतदक्षिण मणे श्रैष्ठ्याय जिन्वतात् ॥१०॥ ॥का° ३॥	* त्वं * मणिमणिश् श्रेष्ठाय जिन्वतः

१६.४५

शौ १०.६.३०[१.४]	असपत्नस् सपत्नहा सपत्नान् द्विषतो ते ऽधरां अकः ।	...सपत्नां * मे धरा *
शौ ३१[१.२]	उत्तरं द्विषतस् त्वा मणिः कृणोतु देवजाः ॥१॥	...देवजा।
शौ ३०[१.२]	मणिं सहस्रवीर्यं ब्रह्मणा तेजसा सह प्रति मुञ्चामि ते शिवम् ।	मणियं * * तेतेजसा सहत्...
शौ ३१[५.६]	स त्वाम् अभि रोहतु देवैः फालमणिस् सह ॥२॥	
शौ ३३	यथा बीजम् उर्वरायां कृष्टे फालेन रोहति ।	...गृष्टे * *
	एवास्मिन् प्रजा पशवो ऽन्नमन्नम् वि रोहतु ॥३॥	यवास्मिन् * * नमंनं * *
शौ ३५	एतम् इध्मं समाभृतं जुषाणो अग्ने प्रति हर्य होमम् ।	...अग्नेः...
	तस्मिन् विदेम सुमतिं स्वस्ति चक्षुः प्राणं प्रजां पशून् जातवेदसि ब्रह्मणा ॥४॥ ॥का° ४॥	* विधेम सुमतीं...

१६.४६

का चासि क्षमा चासि तस्यास् ते भूतिश् च सुभूतिश् चैति मुखे ।	...भूतिं * सुभूतिं चेति *
ताभ्यां ते विधेयं ताभ्यां ते नमः ।	
ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।	...ताभ्यौ * * *
ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।	...सूत्रम्
अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम् ॥१॥	...तन्वा मुमुग्धिर्... एमं
भूमिश् चासि भूतिश् चासि तस्यास् ते भुवनं च सुभूतिश् चै[ति मुखे।	...च
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।	
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।	
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।	
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥२॥	
पृथिवी चासि पार्थिवी चासि तस्यास् ते भविष्य[च्] चाभविष्यच् चै[ति मुखे ।	* * पृथिव्यै... च
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।	
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।	
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।	
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥३॥	
क्षेम्या चासि क्षितिश् चासि तस्यास् ते कं च नाकं चै[ति मुखे ।	...च
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।	
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।	
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।	
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥४॥	
दृढा चासि सुदृढा चासि तस्यास् ते स्वश् च स्वर्गश् चै[ति मुखे ।	...च
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।	
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।	
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।	
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥५॥	
अमितिश् चासि निर्ऋतिश् चासि तस्यास् ते मित्रं च मैत्रं चै[ति मुखे ।	...च

[ताभ्यां ते विधेयं ताभ्यां ते नमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥६॥
शतपृष्ठा चासि विधून्वाना चासि तस्यास् ते विन्दच् च विन्दमानं चे[ति मुखे । * * वधून्वाना ... विन्दश् ... च
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥७॥
सुविता चासि सुवितिश् चासि तस्यास् ते वित्तिश च सुवित्तिश् चै[ति मुखे । ... च
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥८॥
वप्सा ? चासि वप्सतिश् ? चासि तस्यास् ते वसुश् च प्रवसुश् चै[ति मुखे । ... च
[ताभ्यां ते विधेयं ताभ्यां ते यमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बधेभ्यो विमदं न एनम्] ॥९॥
अप्सराश् चासि सदान्वा चासि तस्यास् ते रोहं च रोहश् चै-[ति मुखे । ... रोह * * च
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥१०॥
॥का° ५॥

१६.४७

रोहिणी चासि सुरोहिणी चासि तस्यास् ते यच्छश् च प्रयच्छश् चै[ति मुखे । * * सरोहिणी च
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥१॥
विश्वभृच् चासि विश्वरूपा चासि तस्यास् ते ददच् च प्रददच् चै[ति मुखे । ... तेय * * * च
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥२॥
गिरयन्ती ? चासि गिरिगिरि[श] ? चासि तस्यास् ते विन्दच् च सुवृन्दानं ? चै[ति मुखे । च
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥३॥
गुर्वी चासि गुर्वित्तिरि ? चासि तस्यास् ते दोहश् च दोहनं चै[ति मुखे । गर्वी ... दोहानं च

[ताभ्यां ते विधेयं ताभ्यां ते नमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥४॥
दितिश् चास्य् अदितिश् चासि तस्यास् ते पयश् च पयसश् चै[ति भुखे । …च
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥५॥
जूर्णा चासि जरयन्ती चासि तस्यास् ते दक्षश् च दक्षमाणं चै[ति मुखे । …च
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥६॥
अप्रतिष्ठा चासि प्रतिष्ठिता चासि तस्यास् त ओजश् च तेजश् चै[ति मुखे । * * प्रतिष्ठितः … च
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥७॥
वव्री चासि प्रवव्री चासि तस्यास् ते स्रुवच् च स्रुवसच् ? चै[ति मुखे । उर्वी * प्रव्रवी … च
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥८॥
लोकिनी चासि लोककृच् चासि तस्यास् ते कुर्वच् च संस्कुर्वाणं चै[ति
मुखे ।
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥९॥
नीची चास्य् उत्ताना चासि तस्यास् ते स्वं च स्वावश् चै[ति मुखे ।
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥१०॥
॥का° ६॥

१६.४८

पृश्निश् चासि पृषती चासि तस्यास् ते चान्नं चान्नाद्यं चै[ति मुखे । पृष्णिश् * पृषतीश् … च
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥१॥
सरा चासि सरस्वती चासि तस्यास् ते ब्रह्म च क्षत्रं चै[ति मुखे । …च
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।
[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।
[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।
[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥२॥
वसुभृच् चासि वसुमती चासि तस्यास् ते सूनृता चेरा चै[ति । …ज
[ताभ्यां ते विधेयं ताभ्यां ते नमः ।

	[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।	
	[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।	
	[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥३॥	
	महश् चासि महस्वती चासि तस्यास् ते कामश् च तृप्तिश् चैति [मुखे ।	* * महस्वतीश्...चेति * चेति
	[ताभ्यां ते विधेयं ताभ्यां ते नमः ।	
	[ताभ्यां नो गच्छस् ताभ्यां नो ऽधि ब्रूहि ।	
	[ताभ्यां नो ऽभि जग्रहो ? मातेव पुत्रं पितेव सूनुम् ।	
	[अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम्] ॥४॥	
	सर्वा चासि सर्वं चासीदं ? तस्यास् ते विश्वं च विश्वे च देवा यन्ति मुखे ।	* * * चहेदं...इ * ॥५॥
	ताभ्यां ते विधेयं ताभ्यां ते नमः ।	
	ताभ्यां नो मृड ? ताभ्यां नो ऽधि ब्रूहि ।	
	ताभ्यां नो ऽभि जिग्रह ? मातेव पुत्रं पितेव सूनुम् ।	...जिग्रह ॥६॥ मातेमातेव...
	अयं ते ऽस्मि तन्वं मुमुग्धि ग्राह्या बन्धेभ्यो विमदं न एनम् ॥५॥	...तन्वा...॥७॥
	॥का॰७॥ ॥अनु॰८॥	

१६.४९

शौ ६.११४.१	यद् देवा देवहेडनं देवासश् चकृमा वयम् ।	
	आदित्यास् तस्मा[न्] नो यूयम् ऋतस्य ऋतेन मुञ्चत ॥१॥	... ऋतस्यर्तेन मुञ्चता
शौ २	ऋतस्य ऋतेनादित्या यजत्रा मुञ्चतेह नः ।	* * यदत्रा मुमुञ्चतेह न
	यज्ञै[र् यद्] यज्ञवाहसश् शिक्षन्त उपारिम ॥ २ ॥	* यज्ञमाहसस्सिक्षन्तु *
शौ ३	मेदस्वता यजमानास् स्रुचाज्येन जुह्वतः ।	वेदस्स्वता...
	अकामा विश्वे वो देवाश् शिक्षन्तो नोप शेकिम ॥ ३ ॥	...मेपिम
शौ ६.११५.१	यद् विद्वांसो यद् अविद्वांस एनांसि चकृमा वयम् ।	* विदांसो यदि विद्वासः एनासश् * *
	तस्मान् नो ह्य् अमुञ्चत विश्वे देवास् सजोषसः ॥ ४ ॥	* न...सजोषसा
शौ २	यदि जाग्रद् ऋजत् ? स्वपन्न् एन एनस्यो ऽकरम् ।	...स्वपं येनेनस्यो *
	भूतं मा तस्माद् भव्यं च द्रुपदाद् इव मुञ्चताम् ॥५॥	भूतिं...एवि *
शौ ३ स्विन्नः	द्रुपदाद् इव मुमुचानस् सिन्धौ ? स्नात्वा मलाद् इव ।	...सिन्धु...
	पूतं पवित्रेणेवाज्यं विश्वान् मुञ्चन्तु मैनसः ॥६॥	* पवित्रेणाज्यं...
शौ ६.११६.१	यद् यामं चक्रुर् निखनन्तो अग्रे कार्षीवणा अन्नविदो न विद्यया ।	अद्...कार्षीवरुणानविनो नु *
	वैवस्वते राजनि तज् जुहोम्य् अथ यज्ञियं मधुमन् नो अस्तु ॥७॥	* नराजन * * अधा यज्ञै मधुमान् * *
शौ २	वैवस्वतः कृणवद् भेषजानि मधुभागो मधुना सं सृजाति ।	
	मातुर् यद् एन इषितं न आगन् यद् वा पितापराद्धो जिहीडे ॥८॥	...आगं * * ॰परायद्धो जिहीले
शौ ३	यदीदं मातुर् यदि वा पितुर् नो भ्रातुः पुत्रा[च्] चेतस एन आगन् ।	यददं...भ्रातः * भ्रेतसो न आगं
	यावन्तो अस्मान् पितरस् सचन्ते तेषां सर्वेषां शिवो [अ]स्तु मन्युः ॥९॥	* स्मत् * सजन्ते...
शौ ६.११७.१ तै आ २.३.२	अपमित्यम् अप्रतीत्तं यद् अस्मिन् यमस्य येन बलिना चरामि ।	अपमृन्युम प्रतीतं * * नस्येन * *
[साम मं २.३.२०	इदं तद् अग्ने अनृणो भवामि जीवन्न् एव प्रति ददामि सर्वम् ॥१०॥	...एन * * *
	॥का॰१॥	

१६.५०

शौ ६.११७.२	इहैव सन्तः प्रति दद्म एतज् जीवा जीवेभ्यो नि हराम एनत् ।	...दध्म...हाम *
	अपमित्य धान्यं यज् जघसाग्निर् मा तस्माद् अनृणं कृणोतु ॥१॥	अपमृत्यु * * जघासा अग्निर्...
शौ ३	अनृणा अस्मिन्न् अनृणाः परस्मिंस् तृतीये नाके अनृणास् स्याम ।	अनृणास्मिन्...
	ये देवयाना उत पितृयानास् सर्वान् पथो अनृणा अदीप ? ॥२॥	...पित्र्याणास् सर्वां * * * [प्समाना
शौ ६.११८.१	यद् धस्ताभ्यां चकृमा किल्बिषाण्य् अक्षाणाम् अक्तम् अभिलिप्समानाः ।	* अस्ताभ्यां * किल्विषम् अक्षम् * अविलि-
	उग्रंपश्ये उग्रजितौ तद् अद्याप्सरसाव् अनु दत्ताम् ऋणं नः ॥३॥	* * चद् अघाप्सरसाम् * * ऋडं *
शौ २	उग्रंपश्ये राष्ट्रभृत् किल्बिषाणि यद् अक्षवृत्तम् अनु दत्तं नस् तत् ।	* ॰भृतः किल्विषं * * * दत्त न्वस् * [आयुत्
	ऋणान् नो नर्णं यद् यच्छमानो यमस्य लोके अधिरज्जुर् आयत् ॥४॥	नृण्वा नो नृण्वा * अयइछमानो * * अधियज्जर्
शौ ३	यस्मा ऋणं यस्य जायाम् उपैमि यं याचमानो अभ्यैमि देवाः ।	* रुणी * * उपैमे * याजमानो अअभ्येमहे । वा
शौ वाचं वादिषुः	ते (वाजिन् वाजिभिर् ? मोत्तरां मद् देवपत्नी अप्सरसाव् अधीतम् ॥५॥	* * * * अद् येवपत्नी अप्सरसाप् अदीतम्
शौ ६.११९.१	यद् अदीव्यन्न् अहम् ऋणं कृणोम्य् अदास्यन्न् अग्न उत संगृणामि ।	यदि दैव्यं नाहम् * * अतामरिमन्न् * * संगृणन्तु

	वैश्वानरो नो अधिपा वसिष्ठ उरुं नयातु सुकृतस्य लोकम् ॥६॥	* * धिपानो…
शौ ३	वैश्वानर× पावया[न्] न× पवित्रैर् यत् संगरम् अभिधावाम्य् आशाम् ।	…संगलम् अवि° *
	अनाजानन् मनसा याचमानो यत् तत्रैनो ऽप धित्सामि ॥७॥	अनाजानां यत्र त्वैंन्नोप दिश्छामि
शौ २	वैश्वानराय प्रति वेदयामि तद् अनृणं संगरो देवतासु ।	* * वेदयामे…
	स एतान् पाशान् विचृतं प्र वेदाथ पक्केन सह सं भवेम ॥८॥	* यतान् * * * वेदा अदा * * * *
शौ ६.१२०.१	यद् अन्तरिक्षं पृथिवीम् उत द्यां यन् मातरं पितरं वा जिहिंसिम ।	
	अग्निर् मा तस्माद् एनसो गार्हपत्य× प्र मुञ्चतु ॥९॥	
शौ २	भूमिर् मातादितिर् नो जनित्रं भ्रातान्तरिक्षम् अभिशस्त्या नः ।	* माता अदितिर्…
	द्यौर् न× पिता पित्र्याच् छं भवाति जामिम् ऋत्वा माव पत्सि लोकात् ॥१०॥ ॥का° २॥	* * * पित्र्यात् सम्भवामि जहामि वृत्वा लोकाम् [मविश्य

१६.५१

शौ ६.१२०.३	यत्रा सुहार्दस् सुकृतो मदन्ति विहाय रोगं तन्वस् स्वायाः ।	…तन्व स्याया
	अश्लोणा अङ्गैर् अह्रुतास् स्वर्गे तत्रा पश्येम पितरौ च पुत्रान् ॥१॥	अस्रुणांगैर् हरितास्…पुत्रौ
शौ ६.१२१.१[१.२]	विषाणा पाशान् उत वि ष्याध्य् अस्मद् य उत्तमा अधमा वारुणा ये ।	विपाणां पाशां * * श्य तथयद् उत्तमाधमा * *
शौ २[१.२]	यद् दारुणा बध्यसे यच् च रज्ज्वा यद् भूम्यां बध्यसे यच् च वाचा ॥२॥	* * बध्रमे…बद्धसे * * *
शौ ३ । पै १.९९.२[१.२],३.२.४[१.२]	उद् अगातां भगवती विचृतौ नाम तारके ।	* * * विद्रतौ…
	प्रेहामृतस्य यच्छतां प्रैतु बद्धकमोचनम् ॥३॥	* यश्छतं प्रतो *
शौ ४	वि जिहीष्व लोकं कृणु बन्धान् मुञ्चासि बद्धकम् ।	* जीष्व * * बद्धां…
	योन्या इव प्रच्युतो गर्भ× पथस् सर्वां अनु गच्छा ॥४॥	* यत्र× * * पृथक्…
शौ ६.१२२.१ पै २.६०.२	तं प्रजानन् [प्रति गृह्णाति विद्वान् बृहस्पति× प्रथमजा ऋतस्य ।	} तं प्रजानन् इत्येका
	[अस्माभिर् दत्तं जरस× परस्ताद् अच्छिन्नं तन्तुम् अनु सं तरेम] ॥५॥	
शौ २	ततं तन्तुम् अन्व् एके तरन्तु येषां दत्तम् आयनं पित्र्येण ।	तदं तदत्तम् * * चरन्तु * धत्तम् ऐनं *
	अबन्ध्व् एके जनन्त× प्रयच्छान् दातुं ते शिक्षान् स स्वर्ग एषाम् ॥६॥	अबन्ध * * प्रयश्छां * * शिक्षां म * *
शौ ३	अन्वारभेथाम् अनुसंरभेथाम् एतं लोकं श्रद्दधानास् सचन्ते ।	°रभेताम् अनुपंरभेताम् * * श्रद्धदाना सृजन्ते
	यद् वां पूर्तं प्रविष्टम् अग्नौ तस्य गुप्तये दम्पती सं श्रयेथाम् ॥७॥	विद् वान्…
शौ ६.१२३.३	देवा× पितर× पितरो देवाः ।	
	यो ऽस्मि सो ऽस्मि सो ऽयम् अस्मि ॥८॥	
शौ ४	¿ प्रशजामि शतजामि मेजते स्य ? ।	
	संमैष्णवस्तुष्णोश् ? शान्तं शिवं कृतं तस्मान् मावयम् ? ॥९॥	
शौ ५	नाके राजन् प्र[ति तिष्ठ तत्रैतत् प्रति] तिष्ठतु ।	* राजं…
	विद्धि पूर्तस्य नो राजन् स देव सुमना भव ॥१०॥ ॥का° ३॥	विद्ध * * राजं…

१६.५२

	अपास्माद् ब्राह्मण्यां संधाम् अप धारां नि दध्मसि ।	* ब्राह्मण्यं * अपा…
	इन्द्राग्नी विश्ववेदसाव् अर्णवाद् अधि मुञ्चताम् ॥१॥	* नवस्ववेदसां वर्णावाद् * *
	नमस् ते ब्राह्मणसंधे अपरे ह्य् अतएतः ? ।	* * ब्राह्मणासन्धे…
	यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मस् तं ते प्र सुवामि विधुमध्यं प्र सूर्याः ॥२॥	
	अपारं त्वाहुर् अर्णवम् ¿ अनुर् याजाह्वे ? विदुः ।	
	यस् ते ¿ वेदो नरम् ? आस्य महत् साक्षाद् वेदिमुखम् ॥३॥	
	तव निर्याणं तव ते विदुः ।	* निर्याण…
	इन्द्रेण क्लृप्ता योनिर् नरको ऽस्या× कुलायम् ॥४॥	* क्लिप्ता * * स्या *
	महान् समुद्रो रजसो विमानः ।	महं…
	स्वर्गे लोके अपि न× कृणोतु ॥५॥ ॥का° ४॥	स्वर्गं…

१६.५३

शौ ११.३.१	तस्यौदनस्य बृहस्पति[श्] शिरो ब्रह्म मुखम् ॥१॥	
शौ २ नाना	सूर्याचन्द्रमसाव् अक्ष्यौ बृहद्रथन्तरे श्रोत्रे ॥२॥	* अक्षौ…

	अग्निर् आस्यं विद्युद् जिह्वा ॥३॥	
	मरुतो दन्ता× पवमान× प्राणः ॥४॥	* * पवान× *
	ओषधयो लोमानि वनस्पतय× केशाः ॥५॥	
	समुद्रो मूत्रम् अश्विना प्रपदे ॥६॥	
शौ १८	चरुं पञ्चबिलम् उखं घर्मो ऽभीन्धे ॥७॥	...घर्ममभियंदुहे
शौ ३	चक्षुर् मुसलं काम उलूखलम् ॥८॥	* * कम् ऊ°
शौ ४	[दितिश्] शूर्पम् अदिति[श्] शूर्पग्राही वातो अपाविनक् ॥९॥	...वासोम् अपाविनट्
शौ ५	गावस् तण्डुला अश्वा× कणा मशकास् तुषाः ॥१०॥	गावास् स्तण्डूलाश्व× * मषकास् *
शौ ६ कद्रु फलीकरणाः शरो ऽभ्रम्	खमुत् ? फलीकरणा[ः] ॥११॥	
शौ ७	श्यामम् अयो ऽस्य मांसं [लोहितम्] अयो लोहितम् ॥१२॥	* * लोहितम् अयो स्यं मांसं
शौ ८	त्रपु भस्मार्जुनम् अस्थि हरितं वर्ण× पुष्कलं गन्धः ॥१३॥	त्रिपु * अस्तीर्...
	खल× पात्रम् अष्टारौ बाहू ॥१४॥	फल×...
शौ ९,१०	स्फ्याव् अंसौ गुदा वरत्राः ॥१५॥	स्फामुषदा वरत्रा
	ईषानूक्यं युगानि जत्रवः ॥१६॥	यथानूक्य * चत्रवः
शौ १३	ऋतं हस्तावाभिषेचनं कुल्योपसेचनम् ॥१७॥	ऋचं हस्तामभिषेचनं *
शौ १७	आर्तवा× पक्तारो अग्नि× प्राशिता ब्राह्मण× प्रतिग्रहीता ॥१८॥ ॥का॰५॥	...प्रतिगृह्णता

१६.५४

शौ ११.३.११	तस्यौदनस्य भूमि× कुम्भी द्यौर् अपिधानम् ॥१॥	तस्योदनस्य...
शौ ६	शरो ऽभ्रम् उषा निहारः ॥२॥	शिरो * उष्या *
शौ १६	बृहद् आयवनं रथन्तरं दर्वी ॥३॥	* आयमनो रथन्तर *
शौ १२	दिश× पार्श्वे सीता× पर्शवः ॥४॥	* पार्श शीता पार्षवस्
	सिकता ऊवध्यं वलनम् उपस्तरणम् ॥५॥	सिक्ता उपध्यं वललम् *
	अहोरात्रे विक्रमणे ओदनस्य वर्षं प्रोक्षणं मरुत× परि [द]धति ॥६॥	...प्रोक्षण * पर्थं *
	मरुत× किष्वदिव ? परिधयः ॥७॥	
शौ १४,१५	ऋचा कुम्भ्य् [अ]धिनीयते सार्त्विज्येन प्रेष्यते ब्रह्मणा प्रतिगृह्यते ॥८॥	* कुम्भि ... ब्राह्मणा *
शौ २३	[स य] एतस्यौदनस्यैवं महिमानं विद्या[त्] ॥९॥	एस्यो॰ * *
शौ २४	नाल्प इति ब्रूयान् नानुपसेचन इति नेदं च किं चेति ॥१०॥	* यितु ब्रूयां °सेचनेति नैदं चिगं *
शौ २५	यावद् दाताभिमनस्येत तन् नातिवदे[त्] ॥११॥	* दताभिमनस्ये त्वचं *
शौ १९	ओदनेन यज्ञवचस् सर्वे लोकास् समाप्याः ॥१२॥	* यज्ञवतस्...
शौ २०	अस्मिन् समुद्रो द्यौर् भूमिस् त्रयो ऽवरपरं श्रिताः ॥१३॥ ॥का॰६॥	...स्तुत

१६.५५

शौ ११.३.२६	ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशी× [प्राच्यं त्वम् ओदनं प्राशीः] ।	
शौ नास्ति	यस् त्वाम् ओदन इति कस्यैनं शीर्ष्णा प्राशीः ॥१॥	...कस्येन * प्राशी
	[ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशी× प्राच्यं त्वम् ओदनं प्राशीः ।	
	[यस् त्वाम् ओदन इति कस्]यैनं मुखेन प्रा[शीः] ॥२॥	येन * *
	[ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशी× प्राच्यं त्वम् ओदनं प्राशीः ।	
	[यस् त्वाम् ओदन इति कस्]यैनम् अक्षीभ्यां प्रा[शीः] ॥३॥	येनम् * * (एवम् उत्तरत्र)
	[ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशी× प्राच्यं त्वम् ओदनं प्राशीः ।	
	[यस् त्वाम् ओदन इति कस्]यैनं श्रोत्राभ्यां प्रा[शीः] ॥४॥	
	[ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशी× प्राच्यं त्वम् ओदनं प्राशीः ।	
	[यस् त्वाम् ओदन इति कस्]यैनम् आस्येन प्रा[शीः] ॥५॥	
	[ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशी× प्राच्यं त्वम् ओदनं प्राशीः ।	
	[यस् त्वाम् ओदन इति कस्]यैनं जिह्वया प्रा[शीः] ॥६॥	
	[ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशी× प्राच्यं त्वम् ओदनं प्राशीः ।	
	[यस् त्वाम् ओदन इति कस्]यैनं दन्तै× प्रा[शीः] ॥७॥	
	[ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशी× प्राच्यं त्वम् ओदनं प्राशीः ।	

[यस् त्वाम् ओदन इति कस्]यैनं प्राणैः प्रा[शीः] ॥८॥
[ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशीः प्राच्यं त्वम् ओदनं प्राशीः ।
[यस् त्वाम् ओदन इति कस्]यैनम् उरसा प्रा[शीः] ॥९॥
[ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशीः प्राच्यं त्वम् ओदनं प्राशीः ।
[यस् त्वाम् ओदन इति कस्]यैनं व्यचसा प्रा[शीः] ॥१०॥
[ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशीः प्राच्यं त्वम् ओदनं प्राशीः ।
[यस् त्वाम् ओदन इति कस्]यैनं पृष्ठेन प्रा[शीः] ॥११॥
[ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशीः प्राच्यं त्वम् ओदनं प्राशीः ।
[यस् त्वाम् ओदन इति कस्]यैनम् उदरेण प्रा[शीः] ॥१२॥
[ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशीः प्राच्यं त्वम् ओदनं प्राशीः ।
[यस् त्वाम् ओदन इति कस्]यैनं वस्तिना प्रा[शीः]॥ १३॥
[ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशीः प्राच्यं त्वम् ओदनं प्राशीः ।
[यस् त्वाम् ओदनं इति कस्]यैनम् ऊरुभ्यां प्रा[शीः] ॥१४॥
[ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशीः प्राच्यं त्वम् ओदनं प्राशीः ।
[यस् त्वाम् ओदन इति कस्]यैनम् अष्ठीवद्भ्यां प्रा[शीः] ॥१५॥
[ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशीः प्राच्यं त्वम् ओदनं प्राशीः ।
[यस् त्वाम् ओदन इति] कस्यैनं पद्भ्यां प्रा[शीः] ॥१६॥
[ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशीः प्राच्यं त्वम् ओदनं प्राशीः ।
[यस् त्वाम् ओदन इति] कस्याम् एनं प्रतिष्ठायां प्राशीः ॥१७॥ ...प्राशीत्
ब्रह्मवादिनो वदन्ति प्रत्यञ्चम् ओदनं प्राशीः प्राच्यं त्वम् ओदनं प्राशीः ।
यस् त्वाम् ओदन इति कस्यैनं हस्ताभ्यां प्राशीः ॥१८॥ ॥का° ७॥ ...कस्येनं * प्राशीत्

१६.५६

शौ ११.३.३२ ततश् चैनम् अन्येन शीर्ष्णा प्राशीर् येन चेदम् अग्रे प्राश्नन् । * चेनम् * शार्षा * याभ्यां मेदम् * प्राश्नं
शिरस् ते अव पतिष्यतीत्य् एनम् आह ॥१॥ * त्वाव * * *
शौ ३५ [ततश् चैनम् अन्येन मुखेन प्राशीर् येन चेदम् अग्रे प्राश्नन् ।
[………………इत्य् एनम् आह ॥२॥]
शौ ३४ ततश् चैनम् अन्याभ्याम् अक्षीभ्यां प्राशीर् याभ्यां चेदम् अग्रे प्राश्नन् । * चेदम् अंनाभ्यांम्... मेदम् * प्राश्नं
अन्धो भविष्यसीत्य् एनम् आह ॥३॥
शौ ३३ ततश् चैनम् अन्याभ्यां श्रोत्राभ्यां प्राशीर् याभ्यां चेदम् अग्रे प्राश्नन् । * चेदम् अन्नाद्यम्... मेदम् * प्राश्नं
बधिरो भविष्यसीत्य् एनम् आह ॥४॥
[ततश् चैनम् अन्येनास्येन प्राशीर् येन चेदम् अग्रे प्राश्नन् ।
[………………इत्य् एनम् आह ॥५॥]
शौ ३६ [ततश् चैनम् अन्यया जिह्वया प्राशीर् येन चेदम् अग्रे प्राश्नन् ।
[जिह्वा ते मरिष्यतीत्य् एनम् आह ॥६॥]
शौ ३७ ततश् चैनम् अन्यैर् दन्तैः प्राशीर् यैश् चेदम् अग्रे प्राश्नन् । * चेदम् अन्नैर् * * याभ्या मेदम् * प्राशीर्
दन्तास् ते शत्स्यन्तीत्य् एनम् आह ॥७॥ * * इछसीत्य् * * [याभ्यां मेदमग्रे प्राश्नं
शौ ३८ [ततश् चैनम् अन्यैः प्राणैः प्राशीर् येन चेदम् अग्रे प्राश्नन् ।]
प्राणास् त्वा हास्यन्तीत्य् एनम् आह ॥८॥
शौ ४१ [ततश् चैनम् अन्येनोरसा प्राशीर् येन चेदम् अग्रे प्राश्नन् ।
[……… ………इत्य् एनम् आह ॥९॥]
शौ ३९ ततश् चैनम् अन्येन व्यचसा प्राशीर् येन चेद[म् अ]ग्रे प्राश्नन् । * चेदम्... याभ्या मेद * प्राश्नं
राजयक्ष्मस् त्वा हनिष्यतीत्य् एनम् आह ॥१०॥
शौ ४० ततश् चैनम् अन्येन पृष्ठेन प्राशीर् येन चेदम् अग्रे प्राश्नन् । * चेदम् * * * याद्या मेदम् * प्राश्नं
विद्यु[त्] त्वा हनिष्यतीत्य् एनम् आह ॥११॥
शौ ४२ ततश् चैनम् अन्येनोदरेण प्राशीर् येन चेदम् अग्रे प्राश्नन् । * चेनम् अन्येन उदरेण * याद्या मेदम् * प्राश्नं
ऊरू ते ऽव पत्स्येते इत्य् एनम् आह ॥१२॥ * * * पृश्छेतेत्य् * *
शौ ४३ ततश् चैनम् अन्येन वस्तिना प्राशीर् येन चेदम् अग्रे प्राश्नन् । * चेनम् * * * याद्या मेदम् * प्राष्णं
अप्सु मरिष्यसीत्य् एनम् आह ॥१३॥ * मरिष्यतीत्य् * *

शौ ४४	ततश् चैनम् अन्याभ्याम् ऊरुभ्यां प्राशीर् याभ्यां चेदम् अग्रे प्राश्नन् ।	* चेनम् अन्येन * * याभ्या मेदम् * प्राष्णं
	वरुणस् त्वा छास्यतीत्य् एनम् आह ॥१४॥	* * इछसीत्य् * *
शौ ४५	ततश् चैनम् अन्याभ्याम् अष्ठीवद्भ्यां प्राशीर् याभ्यां चेदम् अग्रे प्राश्नन् ।	* चेदम् अन्येन अध्नीवद्भ्यां * याभ्या
	स्रामो भविष्यसीत्य् एनम् आह ॥१५॥	श्यामो... [मेदम् * प्राष्णं
शौ ४६	ततश् चैनम् अन्याभ्यां पद्भ्यां प्राशीर् याभ्यां चेदम् अग्रे प्राश्नन् ।	* चेनम् अन्येन * * याभ्या मेदम् * प्राष्णां
	सर्पस् त्वा छास्यतीत्य् एनम् आह ॥१६॥	* * इछमीत्य् * *
शौ ४९	ततश् चैनम् अन्यया प्रतिष्ठया प्राशीर् यया चेदम् अग्रे प्राश्नन् ।	* चेनम् अन्येनो प्रतिष्ठायां * याभ्या मेदम्
	अप्रतिष्ठानो मरिष्यसीत्य् एनम् आह ॥१७॥	अप्रअप्रतिष्ठानो... [* प्राष्णं
शौ ४८	ततश् चैनम् अन्याभ्यां हस्ताभ्यां प्राशीर् याभ्यां चेदम् अग्रे प्राश्नन् ।	* चेनम् अन्ये प्रतिष्ठायां * * याभ्या मीदम्
	ब्राह्मणं हनिष्यसीत्य् एनम् आह ॥१८॥ ॥का°८॥	ब्राह्मणो ... [* प्राष्णं

१६.५७

	[ओदनं प्राशीत् ।	
शौ ११.३.३२	तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	... माहम् ओदनं ओदने
	बृहस्पतिना शीर्ष्णाशीत् ॥१॥ [ओदनं प्राशीत् ।]	* शीर्ष्णांशीहद्
शौ ३५	[तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	
	ब्रह्मणा मुखेनाशीत् ॥२॥ [ओदनं प्राशीत् ।]	* मुखेन आशीत्
शौ ३४	[तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	
	सूर्याचन्द्रमसाभ्याम् अक्षीभ्याम् आशीत् ॥३॥ [ओदनं प्राशीत् ।]	सूर्यांश्चन्द्रमसौघासखीभ्यां *
शौ ३३	[तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	
	रथन्तराभ्यां श्रोत्राभ्याम् आशीत् ॥४॥ [ओदनं प्राशीत् ।]	
	[तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	
	अग्निनास्येनाशीत् ॥५॥ [ओदनं प्राशीत् ।]	अग्नेरास्येन आशीद्
शौ ३६	[तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	
	विद्युता जिह्वयाशीत् ॥६॥ [ओदनं प्राशीत् ।]	* जिह्वया आशीर्
शौ ३७	[तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	
	मरुद्भिर् दन्तैर् आशीत् ॥७॥ [ओदनं प्राशीत् ।]	मनद्भिर् ...
शौ ३८	[तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदनो ओदन	
	सप्तऋषिभि× प्राणैर् आशीत् ॥८॥ [ओदनं प्राशीत् ।]	
शौ ४१	[तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	
	पृथिव्योरसाशीत् ॥९॥ [ओदनं प्राशीत् ।]	पृथिव्योरसा आशीद्
शौ ३९	[तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	
	अन्तरिक्षेण व्यचसाशीत् ॥१०॥ [ओदनं प्राशीत् ।]	* व्यचसा आशीद्
शौ ४०	[तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	
	दिवा पृष्ठेनाशीत् ॥११॥ [ओदनं प्राशीत् ।]	युवा पृष्ठेन आशीत्
शौ ४२	[तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	
	[सत्येनोदरेणाशीत् ॥१२॥] [ओदनं प्राशीत्]	
शौ ४३	[तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	
	समुद्रेण वस्तिनाशीत् ॥१३॥ [ओदनं प्राशीत् ।]	* वस्तिना आशीर्
शौ ४४	[तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	
	मित्रावरुणयोर् ऊरुभ्याम् आशीत् ॥१४॥ [ओदनं प्राशीत् ।]	
शौ ४५	[तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	
	ऋतस्याष्ठीवद्भ्याम् आशीत् ॥१५॥ [ओदनं प्राशीत् ।]	ऋतस्याष्ठीवद्भ्याम् *
शौ ४६	[तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	
	सवितु× पद्भ्याम् आशीत् ॥१६॥ [ओदनं प्राशीत् ।]	
शौ ४९	[तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	
	तस्यां प्रतिष्ठायां प्राशीत् ॥१७॥ [ओदनं प्राशीत् ।	
शौ ४८	तम् अहं न प्रत्यञ्चं न पराञ्चं नाहम् ओदनं न माम् ओदन ओदन	* आहं ... माहम् * ओदने
	सत्यस्य हस्ताभ्यां त एनं प्राशिषुस् त एनम् आरुरोहन् त एनम्	* * तेन * तेनम् आरुरोहत् तेनम्
	अजीगमन् ॥१८॥	अजीजगमं

	¿ यत्तस्मां वै लोकां लोकास् त्रयस्त्रिंशतं प्रजापतिन् निर्मितः ? ।	
	यत् त्रयस्त्रिंशत् प्रजापतिः प्रष्ठाः पुण्यलोकाः ।	* * °पतिस् पष्ठाः *
	तस्य सर्वे अभिचिता [अ]विरुद्धा भवन्ति य एवं वेद ॥१८॥ ॥का° ९॥	तेस्य * * * भवन्ती ...

१६.५८

	{ एष वा ओदनस् सर्वाङ्गस् सर्वात्मा सर्वपरुस् सर्वपात् सर्वपृष्ठः ॥१॥	... सर्वपृष्ठयाः
शौ ११.३.३२ ...	{ सर्वाङ्गस् सर्वात्मा सर्वपरुस् सर्वपात् सर्वपृष्ठो भवति य एवं वेद ॥२॥	... सर्वपृष्ठयो ...
शौ ५४	य एवं विदुष उपद्रष्टा भवति प्राणं रुणद्धि ॥३॥	* * वेदुषोपद्रष्टा भवत्युपद्रष्टा * वृणद्धि
शौ ५५	न च प्राणं रुणद्ध्य् अथ सर्वस् सं जीयते ।	* * * वृणद्ध्य् अज * * * अथ सर्वस् सं जीयते
शौ ४९	अथैनम् आहाप्रतिष्ठानो ऽनायतनो मरिष्यसीति ॥४॥	* आह प्रतिष्ठानो ...
	अप्रतिष्ठान एवानायतनो य एवं विदुष उपद्रष्टा भवति ॥५॥	अप्रतिष्ठान्यवानायतनो * * विदुषोपद्रष्टा *
	॥का° १०॥ ॥अनु° ९॥	

१६.५९

शौ १०.२.१	केन पार्ष्णी आभृते पूरुषस्य केन मांसं संभृतं केन गुल्फौ ।	* * याभृते पौरुषस्य ..
शौ केनोच्छ्लङ्खौ	केनाङ्गुलीः पेशनीः केन खानि केनौश्छिनंकौ ? मध्यतः कः प्रतिष्ठाम् ॥१॥	* पेशिनी * खनि ...
शौ २	कस्मान् नु गुल्फाव् अधराव् अकृण्वन्न् अष्ठीवन्ताव् उत्तरौ पूरुषस्य ।	... इकृण्वन्न् अष्ठीवन्ताम् उत्तरो पौरुषस्य
	निर्ऋत्य जङ्घे न्य् अदधुः क स्विज् जानुनोस् संधी क उ तज् जजान ॥२॥	निर्ऋति * नि दधुः कस्य जानिनो संधी मूच
शौ ३	चतुष्टयं युज्यते संहितान्तं जानुभ्याम् ऊर्ध्वं शिथिरं कवन्धम् ।	चतुष्ठं * संहतांत्वं * * शधि * [जानां
	श्रोणी यद् ऊरू क उ तज् जजान याभ्यां कुसिन्धं सुधृतं बभूव ॥३॥	शोणी * ऊरौ व * * जहानौ ...
शौ ४ य उरो ग्रीवाश्चिक्युः	कति देवाः कतमे त आसन् ¿ नीलश् चक्रोर् अग्रियं ? पूरुषस्य ।	* * कतिमे ... पौरुषस्य
	कति स्तनौ न्य् अदधुः कः कफोडौ कति स्कन्धान् कति पृष्टीर् अचिन्वन् ॥४॥	} * * नि दधुः * कपोलौ ... अजिन्वं
शौ ५	को ऽस्य बाहू सम् अभरद् वीर्यं कृणवाद् इति ।	... कृणवान् *
	अंसौ [को] अस्य तद् देवः कुसिन्ध आ दधाद् अधि ॥५॥	अंशो स्य * * कसिन्धा * *
शौ ८	मस्तिष्कम् अस्य यतमो ललाटं ककाटिकां प्रथमो यः कपालम् ।	* अस्ति ...
[२]शौ * * हन्वोः पूरुषस्य	चित्वा चित्यं पुरुषस्य मह्यो दिवं रुरोह कतमस् स देवः ॥६॥	यद्वा चिक्यं * * दिवो * कतमस्य देवाः
शौ ६	कस् सप्त खानि वि ततर्द शीर्षणि कर्णाव् इमौ चक्षणी नासिके मुखम् ।	* * षाणि * * शीर्षाणि कर्णामव् चक्षिणी
	येषां पुरुत्रा विजयस्य मह्मनि चतुष्पादो द्विपादो यन्ति यामम् ॥७॥	येषा * विजायस्य महन्मनि ... योमून् [नासिसी *
शौ ७	हन्वोर् हि जिह्वाम् अदधात् पुरूचीम् अधा महीम् अधि शिश्राय वाचम् ।	अहंनोर * * अदधातु * अधाय मयीम् अध
	[स] वरीवर्ति महिना व्योमन्न् अ[पो] वसानः क उ चित् प्र वेद ॥८॥	... व्योमं ... [सस्याय *
शौ २६	मूर्धानम् अस्य संसीव्याथर्वा हृदयं च यत् ।	* * संसीद्वाथर्वा ...
	मस्तिष्काद् ऊर्ध्वं प्रेरयत् पवमा[नो] ऽधि शीर्ष्णः ॥९॥	
शौ २७	तद् वा अथर्वणश् शिरो देवकोशस् समुब्जितः ।	* वाथर्वणश् ... समुपजितः
	तत् प्राणो ऽभि रक्षति शिरो अन्नम् अथो मनः ॥१०॥ ॥का° १॥	* * * रक्षत श्रीमंनम् * *

१६.६०

शौ १०.२.९	प्रियाप्रियाणि बहुला स्वप्नं संबाधतन्द्र्यः ।	* * स्वप्नो °तन्द्रियः
	आनन्दान् उग्रो नन्दांश् च तान् उद् वहति पूरुषः ॥१॥	आनन्दम् ... अद् * पौरुषः
शौ १०	आर्तिर् अवर्तिर् निर्ऋतिः कुतो ऽधि पुरुषे ऽमतिः ।	* वर्ति * * धिः * *
	राद्धिस् समृद्धिर् अतिवृद्धिर् मतिर् उदितयः कुतः ॥२॥	आध्यः ... उतदयः कुताः
शौ ११	को ऽस्मिन्न् आपो ऽदधाद् विषूवृतः पुरूच्युतस् सिन्धुसृत्याय जाताः ।	... पुरच्यतस् °मृत्याय जाता
	तीव्रा अरुणा लोहिनीस् ताम्रधूम्रा ऊर्ध्वा अवाचीः पुरुषे तिरश्चीः ॥३॥	तीव्रारुणा ... वातीः * तिरश्ची
शौ १२	को ऽस्मिन् रूपम् अदधात् को मह्मानं च नाम च ।	... ज
	गातुं को ऽस्मिन् कः केतुं च कश् चरित्राणि पूरुषे ॥४॥	* * सिन्नि * केतुश् ... पौरुषे
शौ १७	को ऽस्मिन् रेतो ऽदधात् तन्तुर् आ तायताम् इति ।	... तीयताम् इतः
	मेधां को ऽस्मिन्न् अध्य् औहत् को बाणं को नृतं दधौ ॥५॥	* * सिरध्यंहत् * वाशां * अनृतं *
शौ १५	को वाससा पर्य् अदधात् को ऽस्यायु[र् अ]कल्पयत् ।	* * परि द्रधात् ...
	बलं को ऽस्मै प्रायच्छत् को ऽस्याकल्पयज् जवम् ॥६॥	* * स्यै ... जीवं

शौ १३	को ऽस्मिन् प्राणम् अदधात् को अपानं व्यानम् उ ।	
	समानम् अस्मिन् को देवो ऽधि शिश्राय पूरुषे ॥७॥	…शुश्राव पौरुषे
शौ १४	को ऽस्मिन् यज्ञम् अदधाद् एको ऽग्रे अधि पूरुषे ।	…पौरुषे
	को ऽस्मिन् सत्यं को अनृतं को मृत्युं को अमृतं दधौ ॥८॥	
शौ १६	केनापो ऽन्व् अतनुत केनाहर् अकृणोद् रुचे ।	केनामोन्वतनत * * रजे
	उषसं केनान्व् ऐन्द्ध केन सायंभवं ददे ॥९॥	* केनांवैद केना * *
शौ १८	केनेमां भूमिम् और्णोत् केन पर्य् अभवद् दिवम् ।	* * ऊर्णो …युवं
	केनाभि मह्ना पर्वतान् केन कर्माणि पूरुषः ॥१०॥ ॥का° २॥	* * पर्वतां …पौरुषात्

१६.६१

शौ १०.२.२२ दैवजनीर्विशः	केन देवां अनु क्षियति केन देवीर् अजनयद् दिशः ।	* देवौं * क्षीयति..
	केनेदम् अन्यन् नक्षत्रं केन सत् क्षत्रम् उच्यते ॥१॥	केनदम् अन्यं…
शौ $१९^{१.२}$	केन पर्जन्यम् आप्नोति केन सोमं विचक्षणम् ।	
शौ $२०^{३.४}$	केनेदम् अग्निं पुरुषᳶ केन संवत्सरं ममे ॥२॥	…मिमे
शौ २४	केनेयं भूमिर् निहिता केन द्यौर् उत्तरा हिता ।	केनेदं * निहतᳵ…
	केनेदम् ऊर्ध्वं तिर्यक् चान्तरिक्षं व्यचो हितम् ॥३॥	* ऊर्धं त्र्यक्वाच अन्तरिक्षं वचो *
शौ २५	ब्रह्मणा भूमिर् निहिता ब्रह्म द्याम् उत्तरां दधौ ।	ब्राह्मणा * नियता * ज्याम् * *
	ब्रह्मेदम् ऊर्ध्वं तिर्यक् चान्तरिक्षं व्यचो हितम् ॥४॥	* ऊर्धं त्रियक् चान्तान्तरिक्षं वचो *
शौ २०	केन श्रोत्रियम् आप्नोति केन सोमं विचक्षणम् ।	
	केनेदम् अग्निं पुरुषᳶ केन संवत्सरं ममे ॥५॥	…मिमे
शौ $२१^{१.२}$	ब्रह्म श्रोत्रियम् आप्नोति ब्रह्मेमं परमेष्ठिनम् ।	
शौ $१९^{३.४}$	ब्रह्म यज्ञं च श्रद्धां च ब्रह्मास्मिंश् च हितं मनः ॥६॥	* यज्ञस्य श्रद्धा * ब्रह्मास्मि * हतं *
	क इदम् अस्थि [सम् अ]सृजत क इदं मांसं सम् अभरत् ।	* * अस्मिन् …आभरत्
	क इमां त्वचं च [लोमं च] क इदं रूपं सम् ऐरयत् ॥७॥	…ईरयत्
	ब्रह्मास्थि सम् [अ]सृजत ब्रह्म मांसं सम् अभरत् ।	ब्रह्मास्ति * * ब्रह्मे …आभरत्
	ब्रह्म त्वचं च लोमं [च] ब्रह्म रूपं सम् ऐरयत् ॥८॥	ब्रह्मा …ईरयत्
	क इदं चक्षुर् असृजत कᳵ प्राणं केष्व् आमयत् ?।	…प्राणे * *
	क इदं मनश् च वाचं च क इमां सम् अभरत् पुरम् ॥९॥	…अतत् *
	ब्रह्म चक्षुर् असृजत ब्रह्म खे ? प्राणम् आवयम् ?।	
	ब्रह्म मनश् च वाचं च ब्रह्मेमां सम् अभरत् पुरम् ॥१०॥ ॥का° ३॥	…ब्रह्मां * अभवत् *

१६.६२

शौ १०.२.३०	नैनं चक्षुर् जहाति न प्राणो जरसᳵ पुरा ।	…जरजसᳵ पुरᳵ
	पुरं यो ब्रह्मणो वेद यस्मात् पुरुष उच्यते ॥१॥	
शौ २९	यो वै तां ब्रह्मणो वेदामृतेनावृतां पुरम् ।	…वेदावृतेनानामृतं *
	तस्मै ब्रह्म च ब्राह्माश् चायुᳵ प्राणं प्रजां ददुः ॥२॥	* * * ब्रह्मेषाश् * प्रणं * दधुः
शौ ३१	अष्टाचक्रा नवद्वारा देवानां पूर् अयोध्या या ।	* नवंद्वारा देवानं * अयोध्य *
	तस्यां हिरण्मयᳶ कोशस् स्वर्गो ज्योतिषावृतः ॥३॥	* * केशस् * ज्योरुपाभृता
शौ ३२	तस्मिन् हिरण्मये कोशे त्रिदिवे त्रिप्रतिष्ठिते ।	* * केशे…
	तस्मिन् यद् अन्तर् आतमन्वत् तद् वै ब्रह्मविदो विदुः ॥४॥	* * * आतमन्वर् …
शौ ३३	प्रभ्राजमानां हरिणीं यशसा संपरीवृताम् ।	* * यससा संवरीवृताम्
	पुरं हिरण्मयीं ब्रह्मा विवेशापराजिताम् ॥५॥ ॥का° ४॥	पुरो * ब्राह्मा विवेशाचपराजितः

१६.६३

शौ १०.३.१	अयं ते वरणो मणिस् सपत्नक्षयणᳶ कृतः ।	* * वरुणो * सपत्नःक्षेणभ *
	तेना रभस्व त्वं शत्रून् प्र मृणीहि दुरस्यतः ॥१॥	* रभरय * शतृन् * मृणीह *
शौ २	प्रैनां शृणीहि प्र मृणा रभस्व मणिस् ते ऽस्तु पुरएता पुरस्तात् ।	नैनां श्रीहि …प्रयता परस्यत

	अवारयन्त वरणेन देवा अभ्याचारम् असुराणां श्वश्श्वः ॥२॥	* वरुणेन * अभ्यातारम् * स्यश्व
शौ ३	अन्व् आरक्षद् वरणो विश्वभेषजस् सहस्राक्षो हरितो हिरण्मयः ।	* * वरुणो * * वृतो *
	यस् ते शत्रून् अधरान् यातयाति पूर्वस् तान् दभ य उ त्वा द्विषन्ति ॥३॥	* * शतृन् * यानयामि * * दभ्न * * *
शौ ४	अयं ते कृत्यां विततां पौरुषेयम् अयं वधम् ।	* * * व्यततां ... [दिशन्ति
	अयं ते सर्वं पाप्मानं वरणो वारयिष्यते ॥४॥	... वरुणो *
शौ ५	वरणो वारयाता इदं देवो बृहस्पतिः ।	वरुणो वारयावता ...
	यक्ष्मᳲ प्रतिष्ठा यो ऽस्मिन् तम् उ देवा अवीवरन् ॥५॥	यक्ष्मा ... वीवरं
शौ ६	स्वप्नं सुप्त्वा यदि पश्यामि पापं मृगस् स्रुतं यदि धावाद् अजुष्टम् ।	स्वप्नो स्वप्त्वाधि * * मृगश्रुतं * धावारिजुष्टं
	परिक्षवाच् छकुनᳲ पापवादाद् अयं मणिर् वरणो वारयातै ॥६॥	परिश्छवाश् छकुनैः पापवाराद् * * वरुणो *
शौ ७	अरात्या मा निर्ऋत्या अभिचाराद् अथो भया[त्] ।	रभ्या * निर्ऋत्याद् ...
	मृत्योर् ओजीयसो वधात् त्वं वरण वारय ॥७॥	मृत्युर् ओजीयसो * * वरुण *
शौ ९	वरणेन प्र व्यथिता भ्रातृव्या मे सबन्धवः ।	वरुणेन * व्यथता ... सवान्धवः
	असूर्तं रजो ऽप्य् अगुस् ते यन्त्व् अधमं तमः ॥८॥	असूर्न्तां ... तसा
शौ ८	यन् मे माता यन् मे पिता भ्रातरो यच् च मे स्वा यद् एनश् चकृमा वयम् ।	... श्वा * * *
	तस्मान् नो वारयिष्यत इदं देवो बृहस्पतिः ॥९॥	
शौ १०	अरिष्टो ऽयम् अरिष्टगुर् आयुष्मान् सर्वपूरुषः ।	... सर्वपौरुषस्
	तं मायं वरणो मणिᳲ परि पातु दिशोदिशः ॥१०॥ ॥का° ५॥	* * वरुणो * * * दिशोमणिः

१६.६४

शौ १०.३.११[१.२]	अयं मे वरण उरसि राजा देवो वनस्पतिः ।	* * वरुणोरसि * * *
शौ १२[३.४]	स मे क्षेत्रं च राष्ट्रं च पशूंश् चौजश् च मे दधत् ॥१॥	* * क्षत्रं ... वोजश् ...
शौ १२[१.२]	इमं बिभर्मि वरणम् आयुष्मान् शतशारदः ।	* * वरुणम् आयुष्मां *
शौ ११[३.४]	स मे शत्रून् [वि] बाधताम् इन्द्रो दस्यून् इवासुरान् ॥२॥	* * शतृन् ...
शौ १३	यथा वातो वनस्पतीन् जीर्णान् भनक्त्य् ओजसा ।	.. भिनक्त्य् *
	एवा सपत्नांस् त्वं भङ्ग्धि पूर्वान् जातान् उतापरान् वरणस् त्वाभि रक्षतु ॥३॥	यवा * * भङ्क्ति * * उत्रापरान् वरुणस् *
शौ १५	यथा वातेन प्रक्षीणा वृक्षाश् शेरे न्यर्पिताः ।	* * प्रक्षिणा * शरेणार्पितस्
	[एवा सपत्नांस्] त्वं सर्वान् प्र क्षिणीहि न्य् अर्पय [पूर्वान् जातान् उतापरान्] वरणस् [त्वाभि रक्षतु] ॥४॥	* * पक्षिणी त्य् * वरुणा
शौ १४	यथा वातश् चाग्निश् च सर्वान् प्सातो वनस्पतीन् ।	... सर्वा श्छातो *
	एवा सपत्नांस त्वम् प्साहि पूर्वा[न्] जातान् उतापरान् वरणस् त्वाभि रक्षतु ॥५॥	यवा * * श्छाहि ... वरुणस् *
शौ १६	तांस् त्वं प्र छिन्द्धि वरण पुरा दिष्टात् पुरायुषः ।	* त्वां पृश्छन्ति वरुण * दृष्टान् परायुषः
	य एनं पशु[षु] दिप्सन्ति ये वास्य राष्ट्रदिप्सवः ॥६॥	* एवं * * ए * *
शौ १७[१.२]	यथा सूर्यो ऽति भाति यथास्मिन् तेज आहितम् ।	* सूर्योद् भाति * * आहिनं
	एवा सपत्नांस् त्वं सर्वान् अति भाहि श्वश्श्वो वरणस् त्वाभि रक्षतु ॥७॥	यवा * * * इति * स्वश्वो वरुणस् * *
शौ १९	यथा यशᳲ पृथिव्यां यथास्मिन् जातवेदसि ।	
	एवा मे [व]रणो मणिᳲ कीर्त्तिं भूतिं नि यच्छतु तेजसा मा सम् उक्षतु यशसा सम् अनक्तु माम् ॥८॥	यवा * रुणो ... यश्छत ... अक्षतु .. मान्
शौ २२	यथा यशो अग्निहोत्रे वषट्कारे यथा यशः ।	
	[एवा मे वरणो मणिᳲ कीर्त्तिं भूतिं नि यच्छतु तेजसा मा सम् उक्षतु यशसा सम् अनक्तु माम्] ॥९॥	
शौ २१	[यथा यशस्] सोमपीथे मधुपर्के यथा यशः ।	सोमपीते ...
